Sans. MS.
181.4
N993
1207-MS.

न्याय मुक्तावली ॥ संस्कृत भाषा
४८ पत्रक० १४ पं० प्र० पू०

ह० लि० संस्कृत

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पत्राणि ९.

1207-MS.

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भवतिसंसारोऽस्मदादिनि। प्रकृतग्रंथप्रतिबंधकी
भूतदुरितध्वंसायभवतु।

श्री
राम
१

रराजीवेशिष्येया
स्यात्तपावशंप्राप्तः

विन्यस्ताःर्पिताः

ॐश्रीगणेशायनमः चूडामणीकृतविधुर्वलयीकृतवासुकिः भवोभवतुभव्यायलीलाताण्डवपण्डितः १ निजनिर्मितकारिकावलीमतिसंक्षिप्तचिरंतनोक्तिभिः विशदीकरवाणिकौतुकान्ननुराजीवदयावशंवदः २ सद्द्रव्यागुणगुंफितासुकृतिनांसत्कर्मणांज्ञापिकासत्सामान्यविशेषनित्यमिलिताभावप्रकर्षोज्वलाविष्णोर्वक्षसिविश्वनाथकृतिनासिद्धांतमुक्तावलीविन्यस्तामनसोमुदंवितनुतांसद्युक्तिरेषाचिरं ३ विघ्नविघातायकृतंमंगलंशिष्यशिक्षायैनिबध्नाति नूतनेत्यादि नूतनजलधररुचयेगोपवधूटीदुकूलचौरायतस्मैकृष्णायनमःसंसारमहीरुहस्यबीजाय १ ननुमंगलंनविघ्नध्वंसंप्रतिनवासमाप्तिंप्रतिकारणंविनापिमंगलंनास्तिकादीनांग्रंथेनिर्विघ्नपरिसमाप्तिदर्शनादितिचेन्नअविगीतशिष्टाचारविषयत्वेन मंगलस्यसफलत्वेसिद्धेतत्रचफलजिज्ञासायांसंभवतिदृष्टफलकत्वेऽदृष्टफलक

(नित्यःसमवायः; विशेषतः — interlinear glosses)

।मंगलेसमाप्तिफलकेसमाप्त्यापिफलकत्वमितिसफलत्वादितिपरिशेषानुमानेनचमंगलस्यसमाप्तिफलकत्वंव्यवस्थाप्य ...व्यतिरेकव्यभिचारनिरासायफलवत्त्वसाधनसाध्यतिअविगीतेतिशिष्टत्वंचफलसाधनत्वांशेभ्रांतिरहितत्वं२मंगलेनसमाप्तिफलकंमंगलंविनापिसमाप्तिदर्शनात् ...समाप्तिग्रंथहत्तित्वातमंगलेपत्रेहतित्वादितिस्वरूपासिद्धिः।मंगलनसमाप्तिसाधनसमाप्त्यधिकरणहत्यभावप्रतियोगित्वात् यद्यदधिकरणहत्यभावप्रतियोगितत्तदकारणंयथारासभः२ १यागादौव्यभिचारवारणायविशेषणंनिष्फलत्वेव्यभिचारवारणायविशेष्य१पर्यायपर्यायः

समप्रतिग्रंथघट
कीभूतवरणानुकूल
कृत्याधिकरणत्वं
ध्वंसानधिकरणताह
शक्षणेदृत्यर्थः १
ग्रंथारंभसमये
तस्यमंगलस्यतन्नि
बंधस्य...
...फलत्वप्रतिविघ्न
विघातार्थिता४
स्वप्रतियोगिचरम...
नकूलतामवसंबंध
समाप्तिप्रतिआश्रयता
संबंधेनमंगलस्यहेतुतं
समंगलस्यकारणं...
व्यतिरेकव्यभिचारदृष्टेत
माहविनापीति२आचार
शब्दःशास्त्रनशिष्टनिरुक्त
तिरविवक्षिता२

चरमवर्णध्वंसः
समाप्तिःसमाप्तिः

नन्वमंगलमनाचर
णीयंनिष्फलत्वात
नचनिष्फलत्वमेवा
सिद्धंतस्यफलविशे
षस्यानुपलब्धत्वात् जलता
डनादिवत् इत्यभिप्राये
णशंकतेनन्विति३
मंगलस्यफलविगीतशि
ष्टाचारविषयत्वात्दर्शा
दिवत्२कार्याधिकरणवृ
त्यभावप्रतियोगित्व२
स्वरूपासिद्धिवारणायस
माप्त्यधिकरणवृत्यभाव

प्रारब्धस्य कर्मणो निर्विघ्नपरिसमा
प्यतामिति ग्रंथादौ प्रकृतपुरुष
कामनाविषयत्वेन परिशिष्टा
नुमानेन च प्रवर्तमानस्योप
स्थितत्वात् १

अनुमीयते मंगलं समाप्तिफलकं
समाप्त्यन्याफलकत्वे संसफलत्वात् १ ति
मंगलस्य समाप्तिफलकत्वे चेत्यर्थः १

स्वनाया अन्याय्यत्वात् उपस्थितत्वाच्च समाप्तिरेव फलं कल्प्यते इत्थं च यत्र मंगलं न दृश्य
ते तत्रापि जन्मांतरीयं तत्कल्प्यते यत्र च सत्यपि मंगले समाप्तिर्न दृश्यते तत्र वलवत्तरो
विघ्नो विघ्नप्राचुर्यं वा वोध्यम् प्रचुरस्यास्यैव बलवत्तरविघ्नवारणे कारणत्वं वोध्यम् वि
घ्नध्वंसस्तु मंगलद्वारमित्याहुः प्राचः नव्यास्तु वि[illegible]घ्नध्वंस एव मंगलस्य फलं समाप्तिस्तु ।
बुद्धिप्रतिभादिकारणकलापात् न चैवं स्वतःसिद्धविघ्नविरहवता कृतस्य मंगलस्य निष्फ
लत्वापत्तिरिति वाच्यम् इष्टापत्तेः विघ्नशंकया तदाचरणात् तथैव शिष्टाचारात् न चैवं निष्फल
त्वेनुमितितद्बोधकवेदस्याप्रामाण्यम् सति विघ्ने तन्नाशस्यैव वेदबोधितत्वात् अत एव पा
पभ्रमेण कृतप्रायश्चित्तस्य निष्फलत्वेपि न तद्बोधकवेदाप्रामाण्यम् मंगलं तु विशेषका
रणं विघ्नध्वंसविशेषे च विनायकस्तवपाठादिकं विघ्नविघातं तदभावसमाप्तिसाधनं प्र
तिबंधकसंसर्गाभावस्यैव कार्यजनकत्वादित्थं च नास्तिकादिकृतग्रंथेषु जन्मांतरीयमंग ।

अथ नास्तिकः ज
न्मांतरीयकृतमंग
लकः निर्विघ्नस
माप्तिदर्शनात् २
प्रचुरस्य मंगलस्य ३
लवनवो [illegible]सि
नी बुद्धिः प्रतिभा
आदिना संसर्गा
भावपरिग्रहः ५
विघ्नेति संशयनिश्च
यसाधारणविघ्नज्ञा
नमेव प्रवर्तकमिति
भावः ५ आदिना प्राय
श्चित्तपरिग्रहः २
कारणीभूताभाव
प्रतियोगित्वं प्रतिबं
धकत्वम् १

समाप्तिस्त्विति बुद्धिर्धी
नं प्रतिभा तद्विशेषः
सूक्त्यारच्य: प्रतिभा
दीत्यादिना विघ्न
संसर्गाभावग्रहः ८
ननु निष्फलत्वे प्रवृत्ति
रेव कथमिति मंगला
चरणात् ५ ननु विघ्नसं
विघ्नध्वंस ३ शये मंगला
न चेति तत्सा चरणमेवा
निर्विघ्नपुरुषा सिद्धिः ५
नुष्ठितमंगलस्य ५
नाशप्रतिप्रतियोगिनः
कारणत्वादेव ८
मंगलध्वंसयो कार्यकारण
भावबोधक इत्यर्थः ८
पापनाशकबोधकवेदाप्रा
माण्यमित्यर्थः ८

[illegible]

ननु विघ्नध्वंस एव यदि मंगलस्य फलं तदा समाप्तिकाम
स्य मंगले प्रवृत्तिर्न स्यात् अतः समाप्तिसाधनविघ्नध्वं
ससाधनत्वान्मंग[illegible]ले प्रवृत्तिर्वाच्यात च न संभवति ५
स्वतःसिद्धविघ्नविरहस्यले व्यभिचारेण विघ्नध्वंसस्य

ननु मंगलं न विघ्नध्वंसे कारणं किंतु
विनायकस्तवपाठजन्यविघ्नध्वंसे व्यभि
चारात् विनायकस्तवस्य मंगलत्वे
पितदनुकूलकंठवधातत्वपत
त्पाठस्य मंगलत्वाभावात् ३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
न्या मु
२

हेतावस्तु साध्यमाभूत
विपक्षे बाधकाभावात्
अनुकूलतर्काभावात्॥५

लजन्यदुरितध्वंसः स्वतःसिद्धविघ्नात्यंताभावो वास्तीति न व्यभिचार इत्याहुः॥ संसारेति॥१
संसार एव महीरुहो वृक्षः तस्य बीजाय निमित्तकारणाय॥ तेन ईश्वरे प्रमाणं दर्शितं भ
वति यथा घटादिकार्यं कर्तृजन्यं तथा क्षित्यंकुरादिकमपि न च तत्कर्तृत्वमस्मदादीनां॥१
संभवति अतस्तत्कर्तृत्वेन ईश्वरसिद्धिः न च शरीराजन्यत्वेन कर्तृजन्यत्वसाधकेन सत्प्र
तिपक्ष इति वाच्यम् अप्रयोजकत्वात् मम तु कर्तृत्वेन कार्यत्वेन कार्यकारणभावादनुकू
लस्तर्कः द्यावाभूमी जनयन्देव एको विश्वस्य गोप्ता भुवनस्य कर्ता इत्यादय आगमा अ
प्यनुसंधेयाः॥ पदार्थान्विभजते॥ द्रव्यं गुण इत्यादि॥ द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकं॥
समवायस्तथाभावः पदार्थाः सप्त कीर्तिताः॥२ सप्तमस्याभावत्वकथनादेव षण्णां भावत्वं प्राप्तं ते
न पृथगुपन्यासो न कृतः एते च पदार्था वैशेषिकप्रसिद्धा नैयायिकानामप्यविरुद्धाः प्रतिपा
दितं चैवमेव भाष्ये अत एवोपमानचिंतामणौ सप्तपदार्थभिन्नतया शक्तिसादृश्यादीना
मतिरिक्तपदार्थत्वमाशंकितं ननु कथमेत एव पदार्थाः शक्तिसादृश्यादीनामप्यतिरिक्तप॥१
दार्थत्वात् तथाहि मण्यादिसमवहिते न वह्निना दाहो न जन्यते तच्छून्येन तु जन्यते तत्र

ननु इतरे षड्भावपदार्थाः सप्तममस्तु अभाव इति निरूपि
तत्वात्रापि कुतो न निरूपितमित्याशंक्याह सप्तमस्येति॥
पै
आदिनाऽधिकरणत्वादिग्रहः॥२

अभावोऽधिकरण
स्वरूप एवेति प्रभाकर
मतं दूषयितुं नस्य
थेत्युक्तम्॥५
अन्येषु ग्रंथेषु कीर्तिताः
तसैव॥५
भाष्यस्यार्षत्वमाशंका
मणिकृतां संमतिमा
ह अत एवेति॥३

...वादि...
...वरण...
...धिकरणत्वा...

संसारकारणबोधनेन॥२
अस्माकं पादिकर्तृत्वं भ
वेत्तदन्येषां कुतो न इति
गौरवभयात् क्षित्यं
कुरादिकं कर्तृजन्यं शरीरा
जन्यत्वात्॥३

संयोगापेक्षया कर्म
णोऽतिरिक्तत्वं नास्ती
ति भूषणमतं निरा
कर्तुं यथा गुणस्तथा
कर्मापीत्यर्थः॥६
षोडशानां सप्तस्वेवां
तर्भावात् अ
विरुद्धा उक्तार्थे
भाष्यसंमतिमाह
प्रतिपादितेति॥७
आदिना अभिधेयत्व
प्रमेयत्वपरिग्रहः॥३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२एवमति[illegible] प्रसाध्याप्[illegible]या पिऽअतिरिक्तपदा[illegible] शयति एवमित्यादिनाऽति रिक्त इति लुप्तसप्तम्पदा र्थातिरिक्त इत्यर्थः २

तद्धीतित त्सादृश्यं हि हेतौ २ अभावेंतर्भावमाशंक्य निरा चष्टे नापीति ३

न तावद्द्रव्यात्मिका शक्तिः गुणादिवृत्तित्वात् अत एव न गुणात्मिका कर्मात्मिका वा नु च सा मान्याद्यन्यतमत्वरूपा उत्पत्तिमत्वे सति वि नाशित्वात् १ मणिएकाधिसंबंधः मत्व इ स्पतासंबंधः । ओषधसंयोगसंबधः ॥

कल्प्यते ऽनुमीयते ऽतः प्र सामग्री समवहितका र्याभावः किंचित्कारणा भावप्रयुक्तः कार्याभाव त्वात् घटरूपकार्याभाव वत् १

मण्यादिना वह्नौ दाहानुकूला शक्तिर्नाश्यते उत्तेजकेन मण्याद्यपसारणेन च जन्यते इति कल्प्यते एवं सादृश्यमप्यतिरिक्तपदार्थः तद्धि न षट्स्व भावेष्वंतर्भवति सामान्येपि सत्वात् यथा गोत्वं नित्यं तथाश्वत्वमपीति सादृश्यप्रतीतेः नाप्यभावे सत्वेन प्रतीयमानत्वादिति चेन्न मण्याद्यभाव विशिष्टवह्न्यादेर्दाहादिकं प्रति स्वातंत्र्येण मण्यभावादेरेव वा हेतुत्वं कल्प्यते अनेनैव सामं जस्ये ऽनंतशक्तितत्प्रागभावध्वंसकल्पनानौचित्यात् नचोत्तेजके सति प्रतिबंधकसद्भावे पि कथं दाह इति वाच्यम् उत्तेजकाभावविशिष्टमण्यभावस्य कारणत्वात् सादृश्यमपि न पदार्थां तरं किंतु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्वम् यथा चंद्रभिन्नत्वे सति चंद्रगताह्लादजनकत्वादि मत्वं मुखे चंद्रसादृश्यमिति "द्रव्याणि विभजते" क्षितीति" क्षित्यप्तेजोमरुद्व्योमकालदिग्देहि नो मनः द्रव्याण्यथ गुणा रूपं रसो गंधस्ततः परम् ३ क्षितिः पृथिवी आपो जलानि तेजो व

यथेति यदि सादृश्यं द्रव्या दावंतर्भूतं तदा द्रव्यादेः सामान्याद्वृत्तित्वं यथा गोत्वं नित्यं तथाश्वत्वमि त्यबाधितप्रतीतिर्न स्यादि त्यर्थः २

मण्यभावविशिष्टव ह्नेर्दाहं प्रति कारण त्वं वह्निविशिष्टमण्य भावस्य वेत्यत्र विनिग मनाविरहात् उभयस्यै व कारणत्वे गौरवमित्य त आह मण्यभावादेरि ति ४

अनेनैवेति दाहादिकं प्रति मण्यभावादेर्हेतु त्वकल्पनेनैवेत्यर्थः ७ प्रतिबंधकत्वं च कारणी भूताभावप्रतियोगित्वं

उत्तेजकाभावे तितथा च केवलं मणिर्न प्रतिबंधकः किंतु उत्तेजकाभावविशिष्टः तदभावश्चोत्तेजकसमवधानकालेपि तिष्ठतीति न व्यभिचार इति भावः ८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रूपवत्तेति ननु रूपवत्वप्रतीतिर्भ्रांतित्वमपि चलतीति प्रत्यय
सिद्धकर्मवत्वहेतुना तमसि द्रव्यत्वं सेत्स्यतीत्यत आह न हि द्र
व्ये अन्योपाधिकी कर्मप्रतीतिरिति भावः अधस्तनीयपंक्तौ प
र्यायः ३

ननु द्रव्यं द्रव्यमित्यनुगतप्रतीतिरेव
जातिसाधिका भविष्यतीति अत आह २
कर्मवत्वादिति कर्मवत्वं च समवायसंबंधेन विवक्षितं
तेन जन्यमात्रस्य कालिकसंबंधेन कर्मवत्वेऽपि न व्यभि
चारः न चास्य रूपासिद्धिः चलतीति बाधितप्रतीत्या कर्मवत्वसिद्धेः ५

तमसः स्वरूपद्रव्ये ष्वनंतर्भावं निराकुरुते। गंधत्वावच्छिन्न
प्रतियोगिताकात्यंताभाववत्वात् गंधेति गंधाभाव
स्य हेतुत्वोक्तौ पटगतगंधप्रतियोगिकाभावमादा
य घटे व्यभिचारः अतः शून्यत्वमुक्तं ५

श्री
न्याय
मु
एवमा४ २

क्षितिः मरुद्वायुः व्योम आकाशः कालः समयः दिग्दिशा देही आत्मा मनः एतानि नव द्रव्याणि द्रव्य १
त्वः "ननु द्रव्यत्वजातौ किं मानम्" न हि तत्र प्रत्यक्षं प्रमाणं घटजतेजः प्रभृतिषु द्रव्यत्वा
ग्रहादिति चेन्न कार्यसमवायिकारणतावच्छेदकतया संयोगस्य विभागस्य वा समवायिका
रणतावच्छेदकतया द्रव्यत्वजातिसिद्धेरिति ननु दशमं द्रव्यं तमः कुतो नोक्तम् तद्धि प्रत्य
क्षेण गृह्यते तस्य च रूपवत्वात् कर्मवत्वाच्च द्रव्यत्वम् तच्च गंधशून्यत्वात् न पृथिवी नील
रूपवत्वाच्च न जलादिकं तत्प्रत्यक्षे चालोकनिरपेक्षं चक्षुः कारणमिति चेन्न आवश्यकतेजो
ऽभावेनैवोपपत्तौ द्रव्यान्तरकल्पनाया अन्याय्यत्वात् रूपवत्ताप्रतीतिस्तु भ्रमरूपा एवं क
र्मवत्ताप्रतीतिरपि आलोकापसारणौपाधिकी भ्रांत्यैव तमसोऽतिरिक्तत्वे अनंतावयवादि
कल्पनागौरवं च स्यात् सुवर्णस्य यथा तेजस्यंतर्भावस्तथाग्रे वक्ष्यते "गुणान् विभजते

ननु तमसः सिद्धावपि
तस्य द्रव्यत्वे किं मान
मित्याशंक्यानुमानं
प्रमाह तस्येति तम
सः इत्यर्थः चकारेण
नाचनेतितथा च त
मो द्रव्यं रूपवत्वादित्य
नुमानं प्रमाणं सूचि
तं ५
ननु तमसो द्रव्यत्वे आ
लोकनिरपेक्षेण चक्षुरिं
द्रियेण ग्रहो न स्यात् [illegible]
ग्रहस्या [illegible]
चक्षुरिंद्रि [illegible]

ननु दशमद्रव्यस्य
तमसः सत्वान्नव द्रव्या
णीत्ययुक्तमित्यभिप्रा
येणाशंकते ननु क्षिति ४
ननु तमसि प्रमाणाभा
वादेव नायुक्तमित्या
शंक्य तमः साधकं
प्रत्यक्षप्रमाणमाह
तद्धीति तमो हीत्यर्थः ४
प्रत्यक्षेण चक्षुरिंद्रियेण ४
त्य ॥ आवश्यकतेजो
भा राम वेनेति प्रकृष्ट
महत् वाद्भूतानभि
भूतरूपवत्तेजस्त्वाभा
वेनेत्यर्थः अंधकारा
भावएव तेजः किं न स्या
दिति तन्न स्यात् उष्ण
स्पर्शाभावप्रसंगेन
पपत्तेरिति सुवर्णमायाः
ग्रपकृतं २ २

[illegible]

प्रकृष्टमहत्वोद्भूतानभिभूतरूपवत्तेजस्त्वावच्छिन्नाभावस्तमः
यत्किंचित्तेजोभाववति देशेंधकारव्यवहारणाय तेजस्त्वावच्छिन्नेति
सुवर्णवति देशेंधकाराभावव्यवहारणाय अनभिभूतरूपवदिति
तिमर्जनकपालस्य वह्निमति देशेंधकाराभावव्यवहारणाय ×

कंठत इति रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागौ परत्वापरत्वबुद्धयः सुखदुःखेच्छाद्वेषप्रयत्नाश्च गुणा इति गुणविभागसूत्रे सप्तदश कंठेनोक्ताः चशब्देन सूत्रस्थचशब्देन गुरुत्वद्रवत्वस्नेहसंस्काराधर्माधर्मशब्दाः सप्त समुच्चिताः ते च सर्वे एकतया चतुर्विंशतिर्गुणा इह व्यवहृताः ३

अथ गुणा इति अथ रसो गंधस्ततः परं स्पर्शः संख्या परिमितिः पृथक्त्वं च ततः परं संयोगश्च विभागश्च परत्वं चापरत्वकं बुद्धिः सुखं दुःखमिच्छा हि द्वेषो यत्नो गुरुत्वकम् द्रवत्वं स्नेह संस्कारावदृष्टं शब्द एव च एते गुणाश्चतुर्विंशतिसंख्याकाः कणादेन कंठतश्चशब्देन च दर्शिताः तत्र गुणत्वजाति। सिद्धिरेवं वर्तते कर्माणि विभजते उत्क्षेपणमिति उत्क्षेपणं ततोऽपक्षेपणमाकुंचनं तथा प्र। सारणं च गमनं कर्माण्येतानि पंच च ४ कर्मत्वजातिस्तु प्रत्यक्षसिद्धा एवमुत्क्षेपणत्वादिकम पि न च भ्रमणादिकमपि कर्माधिकतया कुतो नोक्तमत आह भ्रमणमिति भ्रमणं रेच नं स्यंदनोर्ध्वज्वलनमेव च तिर्यग्गमनमप्यत्र गमनादेव लभ्यते ५ सामान्यं निरूपयति सा मान्यमिति सामान्यं द्विविधं प्रोक्तं परं चापरमेव च लक्षणं तु नित्यत्वे सत्यनेकसमवे तत्वम् अनेकसमवेतत्वं संयोगादीनामप्यस्त्यत उक्तं नित्यत्वे सतीति नित्यत्वे सति सम

प्रत्यक्षसिद्धेति चलनाकारानुगतप्रत्ययवेद्यत्यर्थः २

कर्माधिकतयेति कर्मविभाजकोपाधिभिर्भ्रमणत्वादिभिः ४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२ एकमात्रेति व्यक्तेरभेद रूपबाधकसत्त्वादिति शेषः अनेकसमवेतत्वस्यैव जातित्वस्वीकारात् २

३ व्यक्तेरभेद इति एकव्यक्तित्वमाकाशत्वादेर्जातित्वे बाधकं। तुल्यत्वं तु तुल्यव्यक्तिवृत्तित्वं घटत्वकलशत्वादीनां जातीनां भेदे· वस्तुतस्तु तुल्यत्वं तुल्यव्यक्तिवृत्तित्वम् स्वाभूतजातिसमनियत
तत्वमिति यावत् तु जातिबाधकमेवेति ध्येयम्। संकरः परस्परात्यन्ताभावसमानाधिकरणयोर्धर्मयोरेकत्र समावेशः। भूतत्वादेर्जातित्वे भूतत्वविहाय मनसि वर्तमानस्य मूर्तत्व
स्य मूर्त॰ त्वं विहाय गगने वर्तमानस्य भूतत्वस्य च पृथ्व्यादिचतुष्टये सत्त्वात्। ननु एवं द्रव्यत्वादीनामपि जातित्वं न स्यात् यावत्स्वाश्रयाश्रितत्वरूपतुल्यव्यक्तिवृत्तित्वस्य
तत्रा॰ श्री पि सत्त्वादित्यत आह वस्तुतस्त्विति तथा च द्रव्यत्वस्य स्वभिन्नजातिसमनियतत्वाभावान्न दोष इति भावः॥ अनवस्थानु जातेर्जातिमत्त्वे यद्यपि निखिलजातिषु वैजा

न्याम
४

वेतत्वं गगनपरिमाणादीनामप्यस्यत उक्तमनेकेति नित्यत्वे सत्यनेकवृत्तित्वं अत्यंताभावप्र
स्यतो वृत्तित्वसामान्यं विहाय समवेतत्युक्तं एकव्यक्तिमात्रवृत्तिस्तु जातिर्न तथा चोक्तम्। १
व्यक्तेरभेदस्तुल्यत्वं संकरोऽथानवस्थितिः रूपहानिरसंबंधो जातिबाधकसंग्रहः द्रव्यादीति
परत्वमधिकदेशवृत्तित्वम् अपरत्वमल्पदेशवृत्तित्वम् सकलजात्यपेक्षयाधिकदेशवृत्ति १
त्वात्सत्तायाः परत्वम् तदपेक्षयान्यासां जातीनाम् परत्वम् द्रव्यादित्रिकवृत्तिस्तु सत्ता परत
योच्यते ८ परभिन्ना तु या जातिः सैवापरतयोच्यते द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ९॥
६ व्यापकत्वात्परापि स्याद्व्याप्यत्वादपरापि च पृथिवीत्वाद्यपेक्षया व्यापकत्वादधिकदेशवृत्तित्वा
त्परत्वम् सत्तापेक्षया व्याप्यत्वादल्पदेशवृत्तित्वाद्द्रव्यत्वादेरपरत्वम् विशेषं निरूपयति अ
न्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः १० अंते अवसाने वर्तत इति अन्त्यः यदपेक्षया वि

५ तदपेक्षयाचेति सत्ता
पेक्षया चेत्यर्थः सत्ता
जातिश्च द्रव्यं सत्गु
णः सन्नित्याद्यनुगत
प्रतीत्यैव सिद्ध्यति ५
नित्यद्रव्यवृत्तिरिति वि
शेषाणां स्थानकथनेन
तुल्यप्रविष्टं प्रयोजनाभा
वात् तत्र विशेषव्यावृत्तौ
नैतत्परमाणु॰ वार
योर्व्यावर्तकाभवेष्यति
किं विशेषेणेति चेन्न व्यावृत्तधर्मस्य
व्यावर्तकत्वाभावात् तत्र व्यावर्तकांत
रापेक्षायामनवस्थानात् १

त्यांतरमेक॰ व्यक्तिवा
तु यापि॰ निखिलजाति
षु कैवैजात्यं॰ तद्वैजा
त्यं तदाश्रयजातिषु
न वैजात्यमेवमग्रेपीत्य
नवस्थाः रूपहानिः नि:
सामान्यगर्भत्वलक्षणव्या
घातरूपा विशेषस्य जा
तिमत्त्वे रूपस्य स्वतोव्या
वर्तकत्वस्य हानिः तत्र जा
तिस्वीकारेन वैत॰ वीति
कृत्वा॰ सामान्याप्र
पस॰ राम सामान्यरू
पेणैव॰ भेदसाधकत्व
नियमा॰ त् न च सामान्य
रूपेण विशेषाणां संभव
तिमाभिचारेणतादृश
नियमानंगीकारे परमा॥

[illegible]

स्वत एवेति स्वतो व्यावृत्तत्वं च स्वभिन्नलिंगजन्यस्वविशेष्य
कस्वसमानजातीयभेदानु
मित्यविषयत्वम् २

शेषो नास्तीत्यर्थः घटादीनां द्व्यणुकपर्यंतानां तत्तदवयवभेदात्परस्परं भेदः सजातीयपरमाणू १
नां परस्परभेदको विशेष एव स तु स्वत एव व्यावृत्तस्तेन तत्र विशेषांतरापेक्षया नास्तीति भावः
समवायं दर्शयति घटादीनामिति घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः तेषु जाते
श्च संबंधः समवायः प्रकीर्तितः ११ अवयवावयविनोर्जातिव्यक्त्योर्गुणगुणिनोः क्रि
याक्रियावतोर्नित्यद्रव्यविशेषयोश्च यः संबंधः स समवायः समवायत्वं नित्यसंबंधत्वम्
तत्र प्रमाणं तु गुणक्रियादिविशिष्टबुद्धिर्विशेषणविशेष्यसंबंधविषया विशिष्टबुद्धित्वात्
दंडी पुरुष इति विशिष्टबुद्धिवत् इत्यनुमानं न च संयोगादिबाधात् समवायसंबंधसिद्धिः १
न च स्वरूपसंबंधेन सिद्धसाधनम् अर्थांतरं वा अनेकस्वरूपाणां संबंधत्वकल्पनागौरवात् १
लाघवादेकसमवायसिद्धिः न च समवायस्यैकत्वे वायौ रूपवत्ताबुद्धिप्रसंगः तत्र रूपस

सिद्धसाधनमिति अप्रुतसिद्धयोः स्वरूपसंबंध इति वदतः
परस्येति शेषः । अर्थांतरं वेति समवायसाधने प्रवृत्ता
नां नैयायिकानामिति शेषः २

रूपवत्ताबुद्धीति रूपवत्ताबुद्धेः प्रमात्वप्रसंग इत्यर्थः
स्पर्शसमवायरूपसमवाययोरैक्यादिति भावः १

चकारेण नित्यद्रव्येषु वि
शेषसंबंधः समुच्चीय
त इत्याह नित्यद्रव्यवि
शेषयोरिति ८

आदिना जातेः परिग्रहः ४

ननु समवायस्यैकत्वे किं
मानमत आह लाघवादि
ति तथा च इत्यादिजन
कतया ईश्वरो लाघवा
देक एव सिध्यति तथा
समवायोपीत्यर्थः १

द्रव्ययोरेव संयोग इति
नियमादिति भावः ३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नचरूपसमवायसत्वेतेनसंबंधेनतत्र कथंरूपाभावः
संबंधसत्वस्यतेनसंबंधेनसंबंधिसत्वव्याप्यत्वादि
तिवाच्यं रूपनिरूपितत्वविशिष्टसमवायस्यैवरूप
संबंधतया वापीतदभावात् १ घटाभावप्रतीतिः ३

अतिरिक्तपदार्थयेतिशेषः १ सिद्धेदित्यस्यभूतलादावित्यादिः १
विशि ष्टस्यनित्यत्वाभ्युपगमपक्षइत्यादि ३
द्वितीयेदूषणमाह ४ घटवतिभूतले २

नाम

मतिवै ... ५
यदिवैशिष्ट्यमंगीक्रियते
तदातन्नित्यमनित्यंवेति
विकल्प्याद्येदूषणमाह २
अन्यथाघटाभावस्यानित्य
त्वेदेशांतरेपिघटशून्य
देशेपीत्यर्थः घटत्वावच्छि
न्नाभावस्यैकत्वादितिभा
वः ३ नचवैशिष्ट्यानंगी
कारेघटाभावभूतलयोः
कःसंबंधः स्वरूपमितिचेत्त
थासतिघटशून्यताद
शायामिवघटवत्तार
शायामपिभूतलेघटा
भावबुद्धिः स्यादतआह तेपिस्या
तयोरभूतलयोस्तत्स्वरूप
संबंधस्यचतत्रसत्वादत
आहएवंचेति ५

मवायसत्वेपिरूपाभावात् नचैवमभावस्यापिवैशिष्ट्यसंबंधांतरंसिद्ध्येदितिवाच्यम् तस्यनि।
त्यत्वेभूतलेघटानयनानंतरमपिघटाभावबुद्धिप्रसंगात् घटाभाववस्यतत्रसत्वात्तस्य
चनित्यत्वात् अन्यथादेशांतरेपितत्प्रतीतिर्नस्यात् वैशिष्ट्यस्यचतत्रसत्वात् ममतुघटेपा
श्यामरूपवत्ता
करक्तदशायांश्यामरूपस्यनष्टत्वात् नतद्बुद्धिः वैशिष्ट्यस्यानित्यत्वेचानंतवैशिष्ट्य
कल्पनेतवैवगौरवम् एवंचतत्तत्कालीनतत्तद्भूतलादिकंतत्तदभावानांसंबंधः अभा
वंविभजते अभावस्त्विति अभावस्तुद्वेधासंसर्गान्योन्याभावभेदतः अभावत्वंद्वि।
व्याप्यद्विकान्योन्याभाववत्वम् संसर्गेति संसर्गाभावान्योन्याभावभेदादित्यर्थः अ
न्योन्याभावस्यएकविधत्वान्नद्विभागाभावात्संसर्गाभावंविभजते प्रागभावइति प्रा।
गभावस्तथाध्वंसोप्यत्यंताभावएवच १२ एवंत्रैविध्यमापन्नः संसर्गाभावइष्यते संसृ

घटाभावस्येत्यर्थः २
घटानयनेघटवति ३
नचसिद्धांतिनोपिमतेपाकेन
घटेश्यामरूपसमवायस्य
सत्वात् श्यामरूपवत्ता
धीप्रसंगः इत्यतआह ३
रेकेश्यपीयस्य
उरिरयम्

नाम
संसर्गेति अन्योन्या
भावेऽतिव्याप्तिवारणाय
न्योन्याभावभिन्नेति २

षष्ठ्येतिरहत्वचद्रव्यत्वादिनप्रतियोगिताविच्छे
दकमननुगमात् किंतुतद्भूतषट्संख्येव
द्विप्रतियोगिभेदस्यद्वित्वमिवेतिधेयम् ३
तत्तत्कालीनमितिघटाभावबुद्धिमितिज्ञानकाली
नमित्यर्थः ५ तत्तद्भूतलादिकमितियत्रभूतलेघ
टाभावबुद्धिस्तद्भूतलादिकमित्यर्थः ५
तत्तदभावानामितियस्या
यस्याभावस्यबुद्धिस्त
स्यतस्येत्यर्थः ५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ध्वंसेतिव्याप्तिवारणाय
विनाशीति २

घटादावतिव्याप्तिवारणायाभावपदम् २
प्रागभावेतिव्याप्तिवारणाय जन्येति २

तादात्म्येति तादात्म्यानता
दात्म्यावच्छिन्नत्वप्रतियोगि
तापाविवक्षितसंयोगावच्छिन्न धाव १
प्रतियोगिताकेसंयोगपत्यंता
भावेनातिव्याप्तिः १ ध्वंसेति ध्वंसादिवारणायनित्यपदम् २

गाभावत्वं अन्योन्याभावभिन्नाभाववत्वं अन्योन्याभावत्वं तादात्म्य संबंधावच्छिन्नप्रतियोगिताकाभा
वत्वं विनाश्यभावत्वं प्रागभावत्वम् जन्याभावत्वं ध्वंसत्वम् नित्यसंसर्गाभावत्वमत्यंताभाव
त्वम् यत्रतुभूतलाद्घटादिकमपसारितं पुनरानीतं च तत्र घटकालस्य संबंधाघटका
लादत्यंताभावस्य नित्यत्वेपि घटकालेन घटात्यंताभाव बुद्धिः तत्रोत्पादविनाशशाली
चतुर्थोभाव इति केचित् अत्र ध्वंसप्रागभावाधिकरणे नात्यंताभाव इति प्राचांमतम् श्या
मघटे रक्तो नास्ति रक्तघटे श्यामो नास्तीति धीश्च प्रागभावं ध्वंसं चावगाहते न तु तदत्यंता
भावं तयोर्विरोधात् नव्यास्तु तत्र विरोधे मानाभावात् ध्वंसादिकालावच्छेदेन घटात्यंता
भावोवर्तते नन्वेवम् अभावानामधिकरणात्मकत्वं लाघवादिति चेन्न अनंताधिकरणा
त्मकत्वकल्पनापेक्षयातिरिक्तकल्पनाया एव लघीयस्त्वात् एवं चाधाराधेयभावोपु

ध्वंसप्रागभावयोरत्यंता
भावेनसाकंविरोधा
त् ३

नन्वेभावस्त्वैधेत्या
दिविभागोनुपपन्नोऽभ
भावेमानाभावादित्य
भिप्रायेणाशंकते २

अभावस्याधिकरणा
त्मकत्वेगौरवप्रदर्श
यितुमनंतेत्युक्तं २

ध्वंसप्रागभावयोरित्यर्थः
अत्यंताभावेन सहेतिशेषः ३
अभावातिरिक्तेत्यर्थः १

एवं चेति अधिकरणापेक्षयाति
रिक्तत्वे चेत्यर्थः १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शब्दगंधरसाद्यभावानां तत्तत्
ज्ञानस्वरूपत्वे ज्ञानस्य तत्तदिं
द्रियैर्ग्रहीतुमशक्यत्वेन प्रत्य
क्षत्वं न स्यात् ३ आदिनाऽभिधेयेति ४

एतेन वक्ष्यमाणदूषणेन
न अप्रत्यक्षत्वापत्ति
रिति दूषणेन २

अन्यथेति अभावस्या
धिकरणात्मकत्वे १

समानो धर्मः सधर्मः
तस्य भावः साधर्म्य
एवं वैधर्म्यमित्यत्रा
पीति भ्रमवारणाय
वृद्धोक्तिमाह समा
नो धर्मो येषामिति ५
केवलान्व[illegible]यादि
ति विषयभेदेन विष
यताभेदेपि ज्ञानवि
षयतात्वे केवलान्व
यित्वमस्त्येवेति भा
वः २

पपद्यते एवं च तत्र शब्दगंधरसाद्यभावानां तत्तदिंद्रियैः प्रत्यक्षत्वमुपपद्यते अन्यथा तत्तदा
धिकरणानां तत्तदिंद्रियाग्राह्यत्वात् प्रत्यक्षत्वं न स्यात् एतेन ज्ञानविशेषकालविशेषा
त्मकत्वमभावस्येति प्रत्युक्तम् अप्रत्यक्षत्वापत्तेः इदानीं पदार्थानां साधर्म्यवैधर्म्ये वक्तुं प्र
क्रमते सप्तानामिति सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते १३ द्रव्यादयः पंच भावा
अनेके समवायिनः समानो धर्मो येषां ते सधर्माणस्तेषां भावः साधर्म्यं समानो धर्म
इति फलितोऽर्थः एवं विरुद्धो धर्मो येषां ते विधर्माणस्तेषां भावो वैधर्म्यं विरुद्धो धर्म इति
फलितोऽर्थः ज्ञेयत्वं ज्ञानविषयता सा च सर्वत्रैवास्ति ईश्वरादिज्ञानविषयतायाः केवला
न्वयित्वात् एवमभिधेयत्वप्रमेयत्वादिकं बोध्यम् द्रव्येति द्रव्यगुणकर्मसामान्यवि
विशेषाणां साधर्म्यं अनेकत्वं समवायित्वं च यद्यपि अनेकत्वं अभावेप्यस्ति तथा

परस्परधर्मतापन्नानां
सप्तपदार्थानामेव प
रस्परभेदकत्वं ज्ञाप
यितुमाह इदानीमि
ति पदार्थनिरूपणा
नंतरमित्यर्थः तदनि
रूपणे तत्पदार्थघटि
तस्य तत्पदार्थस्य
साधर्म्यस्य तथानि
रूपणासंभवा
दिति भावः ३

अभिधेयत्वेति अभिधेयत्वमभिधाविषयत्वं
अभिधा च संकेतमात्रोऽधिकः पदार्थ इति मीमांस
काः संकेतभिन्नायामभिधायां मानाभावात् संकेत एवाभि
धेयेति नैयायिकाः ३

आदिना योगीग्रहः २

प्रमेयत्वमित्यादिनाऽस्ति
त्वपरिग्रहः ३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१अनेकत्वे सति भाववत्त्वमिति
एवं च सत्त्वे द्रव्यादयः पंचेत्यु
द्देश्यपदं भाव अनेक इति
अविधेयपदमिति बोध्यम् १

१अनेकभाववृत्तीत्यादि अत्र चानेकभाववृत्तित्वं स्वप्रतियोगि
वृत्तित्वस्वसमानाधिकरणोभयसंबंधेन भेदविशिष्टत्वे स
ति भाववृत्तित्वं तेन गुणादौ संख्यारूपस्यानेकत्वस्याभावेपि ना
व्याप्तिः भावस्वरूपता दृश धर्ममादाय समवायेतिव्याप्तिवार
णाय पदार्थविभाजकोपाधीति उपाधिमत्त्वा च समवायस्वरू
पान्यतरसंबंधेन तेन न कालिकसंबंधेन ध्वंसस्य तादृशोपाधिम

ष्यनेकत्वे सति भाववत्त्वम् तथा चानेकभाववृत्तिपदार्थविभाजकोपाधिमत्त्वं च फलितोऽर्थः तेन ।
प्रत्येकं घटादावाकाशादौ च नाव्याप्तिः समवायित्वं समवायसंबंधेन संबंधित्वम् न तु
समवायवत्त्वं सामान्यादावभावात् तथा च समवेतवृत्तिपदार्थविभाजकोपाधिमत्त्वम्
फलितोऽर्थः तेन नित्यद्रव्येषु समवेतत्वाभावेपि नाव्याप्तिः ॥ सत्तावंतस्त्रयस्त्वाद्या गुणादि
र्निर्गुणक्रियः १४ सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः ॥ द्रव्यगुणकर्मणां सत्तावत्त्व
मित्यर्थः गुणादिरिति यद्यपि गुणक्रियाशून्यत्वमाद्यक्षणे घटादावतिव्याप्तं क्रियाशून्य
त्वं गगनादावतिव्याप्तम् तथापि गुणवदवृत्तिधर्मवत्त्वं कर्मवदवृत्तिपदार्थविभाजको
पाधिमत्त्वं च तदर्थः न हि घटत्वादिकं द्रव्यत्वं वा गुणवदवृत्ति कर्मवदवृत्ति वा किं तु गुणत्वादि
कं तथाकाशत्वादिकं तु न पदार्थविभाजकोपाधिः सामान्येति सामान्यानधिकरणत्वं सा

निर्गुणक्रिय इति मूलं तदर्थ
श्च गुणक्रियात्यंताभाववत्त्वं
तेन गुणक्रियान्योन्याभाव
मादाय द्रव्ये नातिव्याप्तिः ५
यद्यपि गुणेति गुण - - वामद
त्तिणे विषाणवत्समानका
लीनत्वात्कथं गुणशून्य
त्वमिति वाच्यं निर्गुणगु
णोत्पत्तिस्वीकारेण तत्संभ
वात् न चैवं घटादेराद्यक्षण
स्यावच्छिन्नत्वात्पातानस्या
दिति वाच्यं इष्टापत्तेः ७

आत्मादीनामप्येकार्थसम
वायसंबंधेन सामान्यवत्त्वा
त्सामान्यपरिहीना इतिमू
लमुक्तमतो व्याचष्टे सामा
न्यानधिकरणत्वमिति तथा
च सामान्यनिरूपिताधिकर
णतानाश्रयत्वम् सामान्यादौ एकार्थ
समवायस्याधिकरणतानि
यामकत्वाभावादिति भावः १

पदार्थविभाजकपदस्य कृत्यमाह
आकाशत्वादिकं त्विति कर्मवद
वृत्त्याकाशत्वरूपोपाधिमत्त्याकाशे
ऽतिव्याप्तिवारणाय तत्पदमिति भावः १

गुणवत्ता च समवायसंबंधेन
तेन कालिकेन गुणवदवृत्ते
गुणत्वादेरसंग्रहेपि न क्षतिः ३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

त्वशद्धेन परमाणुपरिमाणं॥
तदाश्रयः [illegible]ः परमाणुः॥
तेन परमाणुनारब्धद्रव्यं द्व्यणुकं॥
द्व्यणुकनिष्ठपरिमाणारंभकं भवेत् ३

पारिमाण्डल्यभिन्नानाम् २
तच्चेति च स्वार्थे तच्छेत्प
रिमाणस्येति ३

२ ननु द्व्यणुकपरिमाणस्यापि कारणता भावात् जाति
व्याप्तिस्ततः पारिमाण्डल्यपदं द्व्यणुपरिमाणस्यापु
पलक्षणं तेन तस्यापि लक्षत्वमित्यभिप्रेत्याह अणु
परिमाणं त्विति परमाणुद्व्यणुकसाधारणमणुपरिमा
णं त्वित्यर्थः २

न्याय

मान्यादीनामित्यर्थः। पारिमाण्डल्येति पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृते १ प पारिमा
ण्डल्यमणुपरिमाणं कारणत्वं च तद्भिन्नानामित्यर्थः अणुपरिमाणं तन्न कस्यापि कार
णं तद्धि साश्रयारब्धद्रव्यपरिमाणारंभकं भवेत्त च न संभवति परिमाणस्य स्वसमानजातीयोत्कृ
ष्टपरिमाणजनकत्वनियमात् महदारब्धस्य महत्तरत्ववदणुजन्यस्याणुतरत्वप्रसंगात्
एवं परममहत्परिमाणं अतींद्रियसामान्यं विशेषाश्च वोध्याः २ आत्ममानसप्रत्यक्षे १
आत्मपरममहत्त्वस्य कारणत्वात् परममहत्परिमाणमाकाशादेर्वोध्यम् तस्यापि न का
रणत्वमित्याचार्याणामाशय इत्यन्ये तन्न ज्ञानातिरिक्तं प्रति अकारणतायाएवाचार्यैरुक्त
त्वात् इदमपि योगिप्रत्यक्षे विषयस्य न कारणत्वं ज्ञायमानं सामान्यं न प्रत्यासत्तिर्ज्ञायमा
नं लिंगं नानुमितिकरणमित्यभिप्रायेणोक्तं नन्वकारणत्वं किमत आह अन्यथासि

ननु ज्ञायमानसामान्यस्य प्रत्यासत्तित्वे ज्ञायमानहेतोरनुमितिहेतुत्वे न पारिमाण्डल्यस्य सामान्यलक्षणाजन्यज्ञाने
ऽनुमितौ च कारणत्वात् पारिमाण्डल्यभिन्नानामिति मूलमसंगतमत आह। ज्ञायमानेति सामान्यं इदमपीत्यारभ्य इत्य
भिप्रायेणोक्तमित्यंतं पाठः प्रथमः। आत्ममानसे इत्यारभ्य आचार्यैरुक्तत्वादित्यंतं पाठः इत्यभिप्रायेणोक्तमित्यतः परः पठनीयः २

पारिमाण्डल्य
स्य कारणत्वे
वाधकमाहत
द्धीति अणुही
त्यर्थः ३

ननु योगिप्रत्यक्षे पारिमाण्ड
ल्यस्यापि विषयविधया कार
णत्वात् पारिमाण्डल्यभिन्ना
भिन्नामित्याद्युक्तमित्यात
इदमपीति यथा योगजधर्मे
णातीतविषयप्रत्यक्षं तथा
विद्यमानाविषयकप्रत्यक्ष
मपीति भावः २
विषयासत्त्वादपि पृथ्या
प्रत्यक्षसंभवतीत्यर्थः तथा
च विषयविधया न कारणत
मिति भावः पर्यायपर्यायः २

न चाणुजन्यस्याणुत्त
रत्वमेवास्तु किं वाधकमि
ति वाच्यं तथा त्रुटेरचाक्षु
षत्वप्रसंगात्॥ ननु तर्हि
द्व्यणुकादिपरिमाणस्य
जनकमेति चेत् संख्यैवेत
वेत्यवेहि द्व्यणुकाभेविष्यति
चेदनुपरिष्टात् ४
५ आत्ममानसेति विषयतया
द्रव्यलौकिकप्रत्यक्षे समवा
येन महत्त्वस्य हेतुत्वादिति भा
वः यद्यपि लप्रत्यक्षे इत्येव
वक्तुमुचितं तथापि टीका
कृन्मते आत्मेके तन्महत्त्व
पारक्यामिप्यत्वात् प्रत्य
क्षं न संभवतीत्यात्मा
नसेत्युक्तम् ५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

द्धिरन्यस्य नियतापूर्ववृत्तिता कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितम् १६ समवायिकारणत्वं ज्ञे
यमथाप्यसमवायिहेतुत्वं एवं न्यायनयज्ञैस्तु तृतीयमुक्तं निमित्तहेतुत्वं १७ यत्समवेतं का
र्यं भवति ज्ञेयं समवायिजनकं तत् तत्रासन्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात् १८ तस्य
स७ कारणत्वं यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणं तच्चेति समवायिकारणे प्रत्यासन्नं
प कारणं द्वितीयमसमवायिकारणमित्यर्थः अत्र यद्यपि तुरीतंतुसंयोगे पटासमवायिका
रणत्वं स्यादेवं वेगादीनामभिघाताद्यसमवायिकारणत्वं स्यादेवं ज्ञानादिकमिच्छाद्यसम
वायिकारणत्वं स्यात्तथापि पटासमवायिकारणलक्षणे तुरीतंतुसंयोगभिन्नत्वं देयम्
तुरीतंतुसंयोगस्तु तुरिपटसंयोगं प्रत्यसमवायिकारणत्वं भवत्येव एवं वेगादिकं स्पंदाद्यस
मवायिकारणं भवत्येवेति तत्तदकार्यासमवायिकारणलक्षणे तत्तद्भिन्नत्वं देयम् आत्म

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

न्याम
८

विशेषगुणानां तद्वृत्त्यसमवायिकारणत्वं नास्ति तेन तद्भिन्नत्वं सामान्यलक्षणेपि देयमेव
असमवायिकारणे प्रत्यासन्नत्वं हि द्विविधं कार्यैकार्थप्रत्यासत्त्या ।
कारणैकार्थप्रत्यासत्त्या वा आद्यं यथा घटादिकं प्रति कपालसंयोगादिकं तत्र कार्येण घटे
न सह कारणस्य कपालसंयोगस्यैकस्मिन् कपाले प्रत्यासत्तिरस्ति द्वितीयं यथा घटरूपं प्र
ति कपालरूपमसमवायिकारणं तत्र घटरूपं प्रति कारणं घटस्तेन सह कपालरू
पस्यैकस्मिन् कपाले प्रत्यासत्तिः तथा च कश्चित्समवायसंवंधेन कश्चित्स्वसमवायिस ।
मवायसंवंधेनेति फलितोर्थः इत्थं च कार्यैकार्थकारणैकार्थान्यतरप्रत्यासमवायिकारणे सत्या
प्रत्यासन्नं कारणं ज्ञानादिभिन्नमसमवायिकारणमिति सामान्यतो लक्षणपर्यवस राम
न्नं आभ्यामसमवायिकारणासमवायिकारणाभ्यां भिन्नं तृतीयं निमित्तकारणमित्यर्थः ८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इदानीमन्यथासिद्धत्वमेव निरूपयितुं तदाह येनसह पूर्वभावः कारणमादायवायस्य अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभाव भाव विज्ञानं १९ यत्कार्यं प्रति कारणस्य पूर्ववर्तिता येन रूपेण गृह्यते तत्कार्यं प्रति तद्रूपमन्यथासिद्धमित्यर्थः यथा घटं प्रति दंडत्वमिति द्वितीयमन्यथासिद्धमाह कारणमिति यस्य स्वातंत्र्येणान्वयव्यतिरेकौ न स्तः किंतु कारणमादायान्वयव्यतिरेकौ गृह्येते तदन्यथासिद्धं यथा दंडरूपं तृतीयमन्यथासिद्धमाह अन्यं प्रतीति अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववर्तिता येन रूपेण गृह्यते तस्य तत्कार्यं प्रति अन्यथासिद्धत्वं यथा घटादिकं प्रत्याकाशस्य आकाशस्य हि कारणत्वं घटादिकं प्रत्याकाशत्वेनैव स्यात् आकाशत्वं तु शब्दसमवायिकारणत्वं एवं च तस्य शब्दं प्रति जनकत्वं गृहीत्वैव घटादिकं प्रति जनकत्वं ग्राह्यम् अतस्तदन्यथासिद्धं ननु

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शब्दाश्रयत्वेनकारणत्वेकान्यथासिद्धिरितिचेत्तंचमीतिगृहाण।अथाकाशस्यशब्दंप्रति
जनकत्वेकिमवच्छेदकमितिचेत्कवत्वादिकंविशेषपदार्थोवेतिचतुर्थमन्यथासिद्ध॰
माह।जनकंप्रतिपूर्ववर्तितामपरिज्ञायनयस्यगृह्यते यत्कार्यंप्रतिकारणस्यपूर्ववृत्तित्वंगृ
हीत्वैवयस्यतत्कार्यंप्रतिपूर्ववृत्तित्वंगृह्यतेतस्यतत्कार्यंप्रत्यन्यथासिद्धत्वं।यथाकुलालपि
तुर्घटंप्रतितस्यहि कुलालपितृत्वेनघटंप्रतिकारणत्वेऽन्यथासिद्धत्वम् कुलालत्वेनरूपेणाज
नकत्वेविवक्षापत्तिः कुलालमात्रस्यघटंप्रतिजनकत्वात्।पंचममन्यथासिद्धमाह।अ
तिरिक्तमथापियद्भवेत्।नियतावश्यकपूर्वभाविनः २ एते ये पंचान्यथासिद्धादंडत्वादि
कमादिमम् घटादौदंडरूपादिद्वितीयमपिदर्शितं २ तृतीयंतत्रभवेद्योमकुलालजन
कोपरः।अवश्यक्लृप्त [illegible] नियतपूर्ववर्तिनाव कार्यसंभवेतद्भिन्नमन्यथासिद्ध॰

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१अवश्यक्लृप्तनियतपूर्ववर्त्ति
भिन्नस्यान्यथासिद्धत्वांगीकारादेव २

१अनेकद्रव्यसमवेतत्वा
पेक्षया महत्त्वे शरीरकृतं
लघुत्वम् ३

मित्यर्थः अत एव प्रत्यक्षे महत्त्वं कारणम् अनेकद्रव्यत्वमन्यथासिद्धम् तत्र महत्त्वमवश्यंक्लृप्तं ते
नानेकद्रव्यत्वमन्यथासिद्धम् न चैवैपरीत्ये किं विनिगमकमिति वाच्यम् महत्त्वत्वजातेः का
रणतावच्छेदकत्वे लाघवात् पंचमो रासभादिः स्यात् यद्यपि यत्तद्घटव्यक्तिं प्रति रासभ
स्य नियतपूर्ववर्तित्वमस्ति तथापि घटजातीयं प्रति सिद्धकारणभावे दंडादिभिरेव कार्योपि
संभवे रासभोन्यथासिद्ध इति एतेष्वावश्यकस्त्वसौ २ एतेषु पंचान्यथासिद्धेषु मध्ये पंचमो
न्यथासिद्ध आवश्यकस्तेनैवान्येषां चरितार्थत्वात् तथा हि दंडादिभिरवश्यक्लृप्तपूर्ववर्ति
भिरेव कार्यसंभवे दंडत्वादिकमन्यथासिद्धं न चैवैपरीत्ये किं विनिगमकमिति वाच्यम् दंड
त्वस्य कारणत्वे दंडघटितायाः परंपरायाः संबंधत्वकल्पने गौरवात् एवमन्येषामप्यनेन चरि
तार्थत्वं संभवति समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम् स्पष्टम् गुणकर्ममात्रवृत्ति ज्ञे।

तत ४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

साधर्म्यवैधर्म्यानुपपोगादयवेतिसत्ताभिन्नद्रव्यत
रूपजातिद्रव्येतिव्याप्तिवारणाय वृत्त्यंतं तत्रैव सत्ता
जातिमादायातिव्याप्तिवारणाय सत्ताभिन्नेति तत्रैव द्र
व्यगुणान्यतरत्वरूपमादायातिव्याप्तिरतो द्रव्यवारणा
यजातीति २

व॰
नां

मूले गुणकर्मणोस्त्वसमवायिकारणत्वमित्युक्तम्
आत्मविशेषगुणेष्वव्याप्तेः अतो वैधर्म्यपरतया
मूलं व्याचष्टे असमवायिकारणत्वामिति १

न्यायम
१०

यमप्याप्यसमवायिहेतुत्वम् २३ असमवायिकारणत्वं गुणकर्ममात्रवैधर्म्येन तद्गुणकर्म
णोः साधर्म्यमित्यत्र तात्पर्यम् अथवा असमवायिकारणवृत्तिसत्ताभिन्नजातिमत्वं तद
र्थः तेन ज्ञानादीनामसमवायिकारणत्वविरहेपि नाव्याप्तिः अन्यत्र नित्यद्रव्येभ्यः आश्रित
त्वमिहोच्यते नित्यद्रव्याणि परमाण्वाकाशादीनि विहायाश्रितत्वं साधर्म्यमित्यर्थः आ १
श्रितत्वं समवायादिसंबंधेन वृत्तित्वम् विशेषणतया नित्यानामपि कालादौ वृत्तेः कालि
कविशेषणतान्यसंबंधेन वृत्तित्वमित्यर्थः इदानीं द्रव्यस्यैव विशिष्य साधर्म्यं वक्तुं प्रक्रमते
'क्षित्यादीनां नवानां तु द्रव्यत्वं गुणयोगिता स्याच्छम् क्षितिर्जलं तथा तेजः पवनो मन एव
च परापरत्वमूर्तत्वक्रियावेगाश्रया अमी २५ पृथिव्यप्तेजोवायुमनसां परत्वमपरत्वं मू १
र्तत्वं वेगवत्वं च साधर्म्यं न च यत्र घटादौ परत्वमपरत्वं वा नोत्पन्नं तत्राव्याप्तिरिति वाच्यम्

कर्मवत्वं १

वृत्तित्वं समवायेन वि
वक्षितं तेन द्रव्यत्वस्य गु
णादौ कालिकेन वृत्तित्वा
न्नातिव्याप्तिः २

राम
१०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

परत्वादिसामानाधिकरणद्रव्यत्वजातिमत्वस्याविवक्षितत्वात् मूर्तत्वमपकृष्टपरिमाणव
त्वम् तच्चैतेषामेव गगनादिपरिमाणस्य कुत्राप्यपकृष्टत्वाभावात् पूर्ववत्कर्मवत्वं क
र्मसामानाधिकरणद्रव्यत्वव्याप्यजातिमत्वं वेगवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्वं
बोध्यम् 'कालखात्मदिशां सर्वगतत्वं परमं महत्' कालाकाशात्मदिशां सर्वग
२५ तत्वं सर्वमूर्तसंयोगित्वं परममहत्वं परममहत्वत्वं जातिविशेषः अपकर्षानाश्रयप
रिमाणवत्वं वा क्षित्यादिपंचभूतानि पृथिव्यप्तेजोवाय्वाकाशानां भूतत्वं तच्च बहिरिन्द्रि
यग्राह्यविशेषगुणवत्वं अत्र ग्राह्यत्वं लौकिकप्रत्यक्षस्वरूपयोग्यत्वं तेन ज्ञातो घट
इति प्रत्यक्षे ज्ञानस्याप्युपनीतभानविषयत्वात्तद्वति आत्मनि नातिव्याप्तिः न वा प्रत्य
क्षाविषयरूपादिमति परमाण्वादावव्याप्तिः तस्य स्वरूपयोग्यत्वात् महत्वत्वलक्ष

अयं महानिति प्रतीतिविषयपरममहत्वस्य गगनादिपरिमाणस्याधारणस्य जातित्वसंभवेप्यात्मपरिमाणमयोग्यमिति टीकोक्तमतमनुसृत्याह ५

आत्मन्यतिव्याप्तिवारणाय बहिः पदं बहिरिन्द्रियग्राह्यजातीयसंयोगादिमति कालादावतिव्याप्तिवारणाय विशेषगुणेति ४

ननु परमाण्वादेः स्वरूपयोग्यत्वात् उक्तेन तस्य प्रत्यक्षत्वमापत्ते आह महत्वे सतीति १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नतु चक्षुरिंद्रियादिगतरूपादिविशेषगुणानाम् अनुद्भूतत्वात् हि इंद्रियग्रहणयोग्यत्वाच्च लक्षणे अव्याप्तिरतो लाघवाच्चैयमेवेति २

४ विशेषगुणत्वं च तत् द्रव्यविभाजकोपाधिसमानाधिकरणवृत्तित्वे सति तद्भिन्नद्रव्यविभाजकोपाधिसमानाधिकरणवृत्तियाजातिस्तद्भिन्नजातिमत्वे सति गुणत्वं स्वाश्रयसमानाधिकरणभेदप्रतियोगितावच्छेदकद्रव्यविभाजकोपाधिसमानाधिकरणसाक्षाद्व्यापकजातिभिन्नजातिमत्वे सति गुणत्वं वा तत् ४

न्याम ११ एकारणांतरासन्निधानान्न प्रत्यक्षम् अथवा आत्मावृत्तिविशेषगुणवत्वं भूतत्वं चत्वारिस्प

र्शवंतः हि २६ पृथिव्यप्तेजोवायूनां स्पर्शवत्वम् द्रव्यारंभश्च तच्चैश्यात् पृथिव्यप्तेजोवायुः

चतुर्षु द्रव्यारंभकत्वं न च द्रव्यानारंभके घटादावव्याप्तिः द्रव्यसमवायिवृत्तिद्रव्यत्वव्याप्य — कारण ३

जातिमत्वस्य विवक्षितत्वात् अथाकाशशरीरेणं अव्याप्यवृत्तिःक्षणिको विशेषगुण

उच्यते २ आकाशात्मनाम् व्याप्यवृत्तिक्षणिकविशेषगुणवत्वम् आकाशस्य हि विशे

त्रिः षगुणः शब्दः स चाव्याप्यवृत् यदा किंचिदवच्छेदेन शब्द उत्पद्यते तदान्यावच्छेदेन तदभाव — दे

घटादिव्यावृत्त्येपरतीयलक्षणमितीति २ स्यापि सत्वात् क्षणिकत्वं च तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वं योग्यविभु (प्रत्यक्षयोग्य) विशेषगुणानां स्वो

त्तरवृत्तिगुणनाश्यत्वात् प्रथमशब्दस्य द्वितीयशब्देन नाशः एवं ज्ञानादीनामपि ज्ञानादि — राम

के हि आत्मनि विभौ शरीरावच्छेदेनोत्पद्यते तदन्यावच्छेदेन तदभावोस्त्येव एवं ज्ञानादिकमपि — ११

प व॥ कार्यतावच्छेदकेयोग्यपदप्रदानेन अपेक्षितत्वादिजन्याद्दृष्टनाशे व्यभिचारवारणाय योग्येति ३ योग्यत्वं चलौकिकसाक्षात्कारविषयनिर्विकल्पकान्यतरत्वे नातीन्द्रियजातिशून्यत्वम् ३ रूपादिना प्रतिव्याप्तिवारणाय विभ्वीति ३ संयोगादिनाशे व्यभिचारवारणाय विशेषेति ३ लौकिकसान्निकर्षजन्यप्रत्यक्षविषयत्वरूपयोग्यत्वम् ३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पिलक्षणद्वयस्यापीदं च अव्याप्यवृत्तिविशेषगुणवत्त्वं लक्षणे विशेषगुणवत्त्वं चार्थः पृथि
व्यादौ रूपादिर्विशेषगुणोऽस्तीत्यतो व्याप्यवृत्तीत्युक्तं पृथिव्यादौ अव्याप्यवृत्तिः संयोगा
दिरस्तीति विशेषेत्युक्तं न च रूपादीनामपि कदाचित् नीलादिलक्षणनाशसंभवात् लक्षणे
कविशेषगुणवत्त्वं नित्यादावतिव्याप्तमिति वाच्यम् चतुःक्षणवृत्तिजन्यावृत्तिजातिम
द्विशेषगुणवत्त्वस्य तदर्थत्वात् अपेक्षाबुद्धिः क्षणत्रयं तिष्ठति रूपत्वादिकं तत्क्षणचतुष्ट
यस्थायिन्यपि रूपादौ वर्त्तते इति तद्व्युदासः ईश्वरज्ञानस्य चतुःक्षणवर्त्तित्वात् ज्ञानत्वस्य
तद्वृत्तित्वात् जन्येत्युक्तं यद्वाकाशजीवात्मनोः साधर्म्यं तत्र जन्येति न देयं द्वेषत्वादिकमा
दाय लक्षणसमन्वयात् परममहत्त्वस्य तादृशगुणत्वात् चतुर्थलक्षणे द्वित्वादीनामपि ना
शाभ्युपगमाद्द्वित्वादीनामपि तथात्वात् तद्वारणाय विशेषेति विलक्षणवृत्तित्वं वाच्यम्।

सुखादेर्लक्षणादि
त्वसमानाधिकरणत्वंताभाव
प्रतियोगित्वमव्याप्यवृत्तित्वम् २

चतुःक्षणवृत्तीनि जन्यानि यानि घटादीनि
तद्वृत्तिर्या जातिः ज्ञानत्वादिः तद्वान् वि
शेषगुणो ज्ञानादिः तद्वत्त्वस्यात्मादौ
सत्त्वात् लक्षणसमन्वयः ४

[illegible]

प्रथमोपस्थितत्वलाघ
वस्य त्रित्वे संभवादत
आह अपेक्षाबुद्धीति
तथा च चिरक्षणवृत्तित्व
वेशे ज्ञानत्वस्य संभवे ल
नस्यादिति भावः ५

शब्दत्वं ज्ञानत्वं वा ४

५ क्षणचतुष्टयं त
न किमपि जन्यज्ञा
नादिकं तिष्ठतिम
त्रुटिरयम् ५
चतुःक्षणवृत्तिजन्यावृ
त्तित्वस्य फले मा रूपत्वा
दिकमिति तद्व्युदासः रूप
त्वजातिव्युदासः तथा च
रूपत्वजातिमद्विशेषगुणव
ति घटादावतिव्याप्तिः सा
निरस्तेति भावः ५

शरीरिणमित्यत्र च मूले शरी
रिपदस्य पर्याप्तार्थकत्वा वा
भिप्रायेणाह ३

ननु जन्यत्वाप्रवेशे ज्ञानत्वेच्छा
त्वप्रजत्नत्वजातीनां चतुर्थ वा
क्षणवृत्तित्वाभावात् क
थं लक्षणसमन्वय अत आ
ह द्वेषेति २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तत्त्व २

न्याय कादिकमादायात्मनि लक्षणासमन्वयात् रूपद्रवत्वप्रत्यक्षयोगिनः प्रथमास्त्रयः पृथि
१२ व्याप्तेजसां रूपवत्वे द्रवत्वे प्रत्यक्षविषयत्वे चेत्यर्थः नच चक्षुरादीनां भर्जनकपालवह्नेः रू स्य २
पाणाश्च रूपवत्वे किं मानमिति वाच्यम् तत्र तेजस्त्वेन रूपानुमानात् एवं वायानीतपृथि
वीजलतेजोभागानामपि पृथिवीत्वादिना रूपानुमानं बोध्यम् नच घटादौ द्रुतसुवर्
णादिभिन्ने तेजसि च द्रवत्वमव्याप्तमिति वाच्यम् द्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजा
तिमत्वस्य विवक्षितत्वात् घृतजतुप्रभृतिषु पृथिवीषु जलेषु द्रुतसुवर्णादौ तेजसि च भिन्ने
व द्रवत्वसत्वात् तत्र च पृथिवीत्वादिसत्वात्तत्रादाय लक्षणासमन्वयः नच प्रत्यक्षविष
यत्वं परमाण्वादावव्याप्तमति व्याप्तं च रूपादाविति वाच्यम् लौकिकचाक्षुषप्रत्यक्षवि णम
षयवृत्तिद्रव्यत्वव्याप्यजातिमत्वस्य विवक्षितत्वात् आत्मन्यतिव्याप्तिवारणाय चाक्षु १२

योगिप्रत्यक्षविषयत्वादाह
श्चातिव्याप्तमिति २

घटो वायुमानिति वा घटे उपनीतभानात्म
कघटविशेष्यकचाक्षुषप्रत्यक्षविषयवायु
वृत्तिद्रव्यत्वव्याप्यवायुत्वजातिमति वायाव
तिव्याप्तिवारणाय लौकिकेति २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वेति गुरुणी द्वे रसवती। गुरुत्ववत्त्वं रसवत्त्वं च पृथिवीजलयोरित्यर्थः न च घ्राणेन्द्रियादी
नां पार्थिवादिभागानां च रसादिमत्वे किं मानमिति वाच्यम् तत्रापि पृथिवीत्वादि
ना तदनुमानात् द्वयोर्नैमित्तिको द्रवः २८ पृथिवीतेजसोरित्यर्थः न च नैमित्तिकं
द्रवत्वं घृतादौ वह्न्यादौ चाव्याप्तमिति वाच्यम् नैमित्तिकद्रवत्वसमानाधिकरणद्रव्यत्व
ति
व्याप्यजातिमत्त्वस्य विवक्षितत्वात्। आत्मनो भूतवर्गाश्च विशेषगुणयोगिनः। आत्मन
इति पृथिव्यप्तेजोवाय्वाकाशात्मनां विशेषगुणवत्त्वमित्यर्थः। यदुक्तं यस्य साधर्म्यं वैध
र्म्यमिति तस्य तत्। ज्ञेयत्वादिकं विहायेति बोध्यम् तत्तत्कस्यापि न वैधर्म्यं केवलान्वयि
त्वात् स्पर्शादयोऽष्टौ वेगाख्यसंस्कारो मरुतो गुणाः स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं तेजसो गुणाः
३० स्पर्शादयोऽष्टौ वेगश्च द्रवत्वं च गुरुत्वकं रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश ३१॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

न्या॰मु॰
१३

स्नेहहीना गंधयुक्ताः क्षितावेते चतुर्दश बुद्ध्यादिषट्कं संख्यादिपंचकं भावना तथा ३२ धर्मा
धर्मौ गुणा एते आत्मनः स्युश्चतुर्दश संख्यादिपंचकं कालदिशोः शब्दश्च ते च खे ३३
संख्यादयः पंच बुद्धिरिच्छा यत्नोपि चेश्वरे परापरत्वे संख्यादिपंच वेगश्च मानसे ३४ वायो
र्नवैकादश तेजसो गुणाः जलक्षितिप्राणभृतां चतुर्दश दिक्कालयोः पंच षडेव चांव
रे महेश्वरेष्टौ मनसस्तथैव च ३५ ते च संख्यादयः पंच खे आकाशे साधर्म्यं वैधर्म्यं च नि
रूप्य संप्रति प्रत्येकं पृथिव्यादिकं निरूपयति । तत्रेति क्षितिर्गंधहेतुः गंधहेतुरिति गंधस
मवायिकारणमित्यर्थः यद्यपि गंधमात्रं लक्षणमुचितं तथापि पृथिवीत्वजातौ प्र
माणोपन्यासाय कारणत्वमुपन्यस्तम् तथाहि पृथिवीत्वं हि गं[धस]मवायिकारण
तावच्छेदकतया सिध्यति अन्यथा गंधत्वावच्छिन्नस्याकस्मिकत्वापत्तेः न च पाषा

राम
१३

प

णादौ गंधाभावाद्गंधवत्त्वमव्याप्तमिति वाच्यम् तत्रापि तत्सत्वात् अनुपलब्धिस्त्वनुत्कट
त्वेनाप्युपपद्यते अन्यथा तद्भस्मनि गंधः कथमुपलभ्यते भस्मनो हि पाषाणध्वंसजन्यता
त् पाषाणोपादानोपादेयत्वसिद्ध्यति पदद्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयत्वमि
ति व्याप्तिः दृष्टं चैतत् खंडपटे महापटध्वंसजन्ये इत्थं च पाषाणपरमाणोः पृथिवीत्वात्
त् जन्यपाषाणस्यापि पृथिवीत्वं तथा च तस्यापि गंधवत्त्वे बाधकाभावः॥ नानारूपवतीम
तां शुक्लनीलादिभेदेन नानाजातीयं रूपं पृथिव्यामेव वर्तते न तु जलादौ तत्र शुक्ल
स्यैव सत्वात् पृथिव्यां त्वेकस्मिन् धर्मिणि पाकवशेन नानारूपवत्त्वसंभवात् न च
यत्र नानारूपं नोत्पन्नं तत्राव्याप्तिरिति वाच्यम् रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्व
स्य विवक्षितत्वात् रूपनाशवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं वा वाच्यम् वैशेषिक

त

राम
१९

नचपृथिवीपरमाणौरूपनाशस्यरूपांतरस्यचसत्वात् न्यायनयेघटादावपितत्तत्वा
ल्लक्षणासमन्वयः षड्विधस्तुरसस्तत्र मधुरकटुकषायादिभेदेनषड्विधोरसःस
पृथिव्यामेव जलेतुमधुरोरसःअत्रापिपूर्ववद्रसवद्वृत्तिद्रव्यत्वव्याप्यजाति
मत्वस्यविवक्षितत्वात् ॥ गंधस्तुद्विविधोमतः इदं द्विविधइतिवृत्त्यास्थिति
मात्रंनतुद्विविधगंधवत्वमपिलक्षणं द्विविधत्वस्यव्यर्थत्वात् द्वैविध्यंचसौरभा
सौरभभेदेनबोध्यम् स्पर्शस्तस्यास्तुविज्ञेयोह्यनुष्णाशीतपाकजः तस्याःपृ
व्याः अनुष्णाशीतस्पर्शवत्वंवायावपिवर्ततइत्युक्तंपाकजइति इत्येचपृथिव्याः
स्पर्शोऽनुष्णाशीतइतिज्ञापनार्थंतदुक्तम् पाकजस्पर्शवत्वमात्रंलक्षणं अ
धिकस्यवैयर्थ्यात् यद्यपिपाकजस्पर्शोघटादौनास्ति तथापिपाकज॰

राम
१९

स्पर्शवद्वृत्तिद्रव्यत्वव्याप्य जातिमत्व मर्थो वोध्यः॥ नित्यानित्यात सा द्विधा नित्यास्या
द्यात्मलक्षणा ॥२०॥ अनि त्यात तदन्यास्यात्सैवावयवयोगिनी॥ सा पृथिवी द्विधा नि
त्यानित्या चेत्यर्थः॥ आद्या लक्षणा परमाणुरूपा पृथिवी नित्या तदन्या परमाणुभि
न्ना पृथिवी द्व्यणुकादि लक्षणा सर्वाप्यनित्येत्यर्थः सैवानित्या पृथिवी चावयववती
त्यर्थः नन्ववयविनि किं मानं परमाणुपुंजैरेवोपपत्तेः नच परमाणूनामतीन्द्रियत्वात्
घटादेः प्रत्यक्षत्वं न स्यात् इति वाच्यम् एकस्य परमाणोरप्रत्यक्षत्वेपि तत्समूहस्य
य प्रत्यक्षत्वोपयोगात्तथैकस्य केशस्य दूरे प्रत्यक्षत्वेपि तत्समूहस्य प्रत्यक्षत्वं न चैकः
स्थूलो घट इति बुद्धेरनुपपत्तिरिति वाच्यम् एकमहान्धान्यराशिरितिवदुपपत्तेः मैवं प य
रमाणोरतीन्द्रियत्वे न तत्समूहस्य प्रत्यक्षत्वायोगात् दूरस्थकेशस्तु नातीन्द्रियः स

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

त्रिहतस्यतस्यैवप्रत्यक्षत्वात् नचतदानींह्रस्वपरमाणुपुंजस्योत्पन्नत्वात्प्रत्यक्षत्वेवि
रोधइतिवाच्यम् अह्रस्वस्यह्रस्वपानुमा नात् अन्यथाचक्षुरूपादिसंततौकदाचिह्र
स्वत्वप्रसंगःस्यात् नचातितप्ततैलादौकथमह्रस्वदहनसंततेर्ह्रस्वदहनोत्पत्ति-
रितिवाच्यम् तत्रतदंतःपातिभिर्ह्रस्वदहनावयवैः स्थूलदहनोत्पत्तेरभ्युपग
मात् नचाह्रस्वेनद्व्यणुकेनकथंह्रस्वत्रसरेणोरुत्पत्तिरितिवाच्यमपतेनवयंह्रस्व-
त्वमह्रस्वत्वमह्रस्वत्वंवा किंस्वाभाविकत्वभावादाचक्ष्महे किंतमहत्त्वोद्भूतरूपादि-
कारणसमवायवशाह्रस्वत्वं तदभावेचाह्रस्वत्वं तथाचत्रसरेणोर्महत्त्वात्प्रत्य
क्षत्वं नतद्व्यणुकादेस्तदभावात् नहितन्मतेपीदंसंभवतिपरमाणोर्महत्त्वाभा
वात् द्रव्यंचावयविसिद्धौ तेषामुत्पादविनाशयोःप्रत्यक्षसिद्धत्वादनित्यत्वं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तेषां चावयवावयवविधारायाः अनंतत्वे मेरुसर्षपयोरपि साम्यप्रसंगः अतः क्वचिद्विश्रा
मो वाच्यः यत्र च विश्रामस्तस्यानित्यत्वे समवेतकार्योत्पत्तिप्रसंगः स्यादतस्य नित्य
त्वं परममहत्परिमाणतारतम्यस्य गगनादौ विश्रांतत्वमिवाणुपरिमाणतारतम्य
स्यापि क्वचिद्विश्रांतत्वमस्तीति तस्य परमाणुत्वसिद्धिः न च त्रसरेणावेव विश्रामोस्त्वि
ति वाच्यम् त्रसरेणुः सावयवः चाक्षुषद्रव्यत्वात् घटवदित्यनुमानेन तदवयवसिद्धेः
त्रसरेणोरवयवाः सावयवाः महद्द्रव्यारंभकत्वात् कपालवदित्यनुमानेन तदवयवसि
द्धिः न चेदमप्रयोजकम् अपकृष्टमहत्त्वं प्रत्यनेकद्रव्यत्वस्य प्रयोजकत्वात् न चैवं
क्रमेण तदवयवधारापि सिद्ध्येदिति वाच्यम् अनवस्थाभयेन तदसिद्धेः सा च त्रि
धा भेदे देहमिंद्रियं विषयस्तथा ॥ सा कार्यरूपा पृथिवी त्रिविधा शरीरेंद्रियविषयभे

न्याय दादित्यर्थः नन्वदेहमुदाहरन्तियोनिजादिभवेदेहम् योनिजमयोनिजं चेत्यर्थः
१६ योनिजमपिहि द्विविधम् जरायुजमंडजंचेति जरायुजंमनुष्यादीनामंडजंसर्पा
दीनां अयोनिजंस्वेदजोद्भिज्जादिकं स्वेदजाः कृमिदंशाद्याः उद्भिज्जास्तरुगुल्मा
द्याः नारकिणांशरीरमप्ययोनिजम् नचमानुष्याणांशरीरेपार्थिवत्वेकिंमानमि
तिवाच्यम् गंधादिमत्वस्यैवप्रमाणत्वात् नचक्लेदोष्मादेरुपलंभादाप्यत्वादिकमपिस्यादि
तिवाच्यम् तथासति जलत्वपृथिवीत्वादिना संकरप्रसंगात् नचतर्हि जलत्वमेवास्तुनतुपार्थि
वत्वमिति वाच्यम् स्वेदादीनांविनाशेपिशरीरत्वेनप्रत्यभिज्ञानात् गंधाद्युपलब्धेश्चपृथिवी
त्वसिद्धेः एतेनपार्थिवादिशरीरेजलादीनांनिमित्तमात्रंवोध्यम् शरीरत्वंतुनजातिः पृथिवी
त्वादिनासांकर्यात् किंतुचेष्टाश्रयत्वं वृक्षादीनामपिचेष्टाश्रयत्वान्नाव्याप्तिः नचहस्ता राम
देःशरीरत्वेकिंमानमितिवाच्यम् आध्यात्मिकवायुसंबंधस्यप्रमाणत्वात् तत्रैवकिंमा १६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नमितिचेत् भग्नक्षतसंरोहणादिनातद्वन्नयनात् यदिहस्तादौशरीरव्यवहारोनभवतितदां
त्यावयवित्वेनतद्विशेषणीयं नचयत्रशरीरेचेष्टानजाता तत्राव्याप्तिरितिवाच्यम् ताद्दशेप्रमा
णाभावात् अथवाचेष्टावदंत्यावयविव्रत्तिद्रव्यत्वव्याप्य जातिमत्त्वस्यविवक्षितत्वात् अंत्या
वयविमात्रव्रत्तिचेष्टावद्वृत्तिजातिमत्त्वं वातत् मानुषत्वचैत्र त्वादिजातिमादायलक्षणसमन्व ए४
मु१ यः नचनरसिंहशरीरेतल्लक्षणासमन्वयः तत्रनरसिंहस्यैकत्वेनजातिमत्त्वाभावात् जलीयतै
जसशरीरव्रत्तितयादेवत्वस्यापिजातित्वाभावादितिवाच्यम् कल्पभेदेननरसिंहशरीरस्यैवनाना
त्वेननरसिंहत्वजातौलक्षणसमन्वयात् इंद्रियंघ्राणलक्षणं घ्राणेंद्रियंपार्थिवमित्यर्थः पार्थिवत्वं
कथमितिचेत् इत्थं घ्राणेंद्रियंपार्थिवं रूपादिषुमध्येगंधस्यैवाभिव्यंजकत्वात् कुंकुमगंधाभिव्यं
जकघृतादिवत् नचदृष्टांतेस्वीयरूपादिव्यंजकत्वात् असिद्धिरितिवाच्यम् परकीयरूपाद्यव्यंजक

त्सा ३

न्याम
१८

त्वस्यतदर्थत्वात् नचनवशरावव्यंजकजले नानैकांतिकमितिवाच्यम् तस्यशक्तौ साभिव्यंजक
त्वात् यद्वापरकीयेति नदेयवायूपनीतसुरभिभागस्यदृष्टांतत्व संभवात् नचघ्राणेंद्रियस
न्निकर्षस्यगंधमात्रत्वव्यंजकत्वान्नव्यभिचारइतिवाच्यम् द्रव्यत्वेसतीतिविशेषणात्' विषयो
घ्राणकादिब्रह्मांडांत उदाहृतत्वं ९ उपभोगसाधनंहिविषयः सर्वमेवहिकार्यजातमदृष्टा
धीनंयच्चकार्यंयदृष्टाधीनंतत्तदुपभोगसाक्षात्परंपरयावा जनयत्येवनहिबीजमयोजना
भ्यांविनाकस्यचिदुत्पत्तिरस्ति तेन घ्राणकादिब्रह्मांडांतंसर्वमेवविषयोभवति शरीरेंद्रियो[illegible] वि
षयत्वेपिप्रकारांतरेणोपन्यासः शिष्यबुद्धिवैशद्यार्थः जलंनिरूपयति वर्णः[illegible]क्तः स्नेह
समवायिकारणतावच्छेदकतया जलत्वंजातिःसिद्ध्यति यद्यपिस्नेहत्वंनित्यानित्यवृत्तितया
नकार्यतावच्छेदकं तथापिजन्यस्नेहत्वंतथावोध्यम् अन्यथापरमाणौजलत्वंनस्यात् तत्रजन्य

राम
१८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्नेहाभावात तस्यचनित्यस्यस्वरूपयोग्यत्वेफलावश्यंभावनियमादितिचेन्नजन्यस्नेहजन
कतावच्छेदकायाःजन्य जलत्व जातेःसिद्धौतदवच्छिन्नजनकतावच्छेदकतायाजलत्व।
जातिसिद्धेरितिशुक्लरूपमेवजलस्येतिदर्शयतमुक्तं वर्णः शुक्लइति नतुशुक्लरूपवत्वंल
क्षणम् अथवानैमित्तिकद्रवत्ववद्वृत्तिशुक्लरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्वं अ
भास्वरशुक्लेतररूपासमानाधिकरणरूपव वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्वंवातद
र्थः तेनस्फटिकादौनातिव्याप्तिः रसस्पर्शौजलेमधुरशीतलौजलस्यमधुरएवरसः शी
तएवस्पर्शः तिक्तवद्वृत्तिमधुरवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्वंतेननशर्करादौनातिव्याप्तिः
शीततरस्पर्शवद्वृत्तिशीतस्पर्शवद्वृत्तिवातदर्थः ननुशुक्लरूपमेवेतिकुतः कालिंदीज
लादौनीलमोपलब्धेरितिचेन्ननीलजनकतावच्छेदकायाःपृथिवीत्वजातेरभावात्ज

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

न्याम लेनीलरूपासंभवात्कालिंदीजलेनीलत्वप्रतीतिस्त्वाश्रयोपाधिकी अतएवविलेपधवा- पति
१८ लिमोपलब्धिः अथ जलेमाधुर्यंकिमाननहिप्रत्यक्षेणकोपिरस स्तन्नानुभूयतेनचनालि-
केरजला दौमाधुर्यमुपलभ्यतएवेतिवाच्यम् तस्याश्रयोपाधिकत्वात् अन्यथा जंबीर
रसादावाम्लाद्युपलब्धेराम्लादिमत्वमपिस्यादितिचेन्न हरीतक्यादिभक्षणास्यजलरसव्यंजक
त्वात्तन्नचहरीतक्यामेवजलोष्मसंयोगाद्रसांतरोत्पत्तिरितिचेन्नकल्पनागौरवात्
पृथिवीत्वस्याम्लादिजनकतावच्छेदकत्वाच्च जलेना म्लादिकं जंबीररसादौत्वाश्रयोपा- २५
धिकीतथाप्रतीतिः एवंजन्यशीतस्पर्शजनकतावच्छेदकंजन्यज लत्वंतदवच्छिन्न
जनकतावच्छेदकं [illegible] जलत्वंवाध्यंघृष्टचंदनादौतथैत्योपलब्धिः राम
स्पंदनांतर्वर्त्तिशीततरसलिलस्यतेजःसंयोगात्जलेउष्णप्रतीतिरौपाधि १८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कीस्त्रूदैवतत्रचपाकासंभवात् ॥ स्नेहस्तत्रद्रवत्वं तत्सांसिद्धिकमुदाहृतम् ॥३९॥ घृतादावपि
तदंतर्वर्तिजलस्यैवस्नेहः जलस्यस्नेहसमवायिकारणत्वात् तेनजलएवस्नेहइतिमं
तव्यम् द्रवत्वमितिसांसिद्धिकद्रवत्वत्वंजातिविशेषःप्रत्यक्षसिद्धः तदवच्छिन्न जनकता
वच्छेदकमपितदेवेतिभावः तैलादावपिजलस्यैवद्रवत्वंस्नेहप्रकर्षेणचदहनानुकूल्य
मितिवदंतिनित्यत्वादिप्रथमवत् पृथिव्याइवेत्यर्थः जलंद्विविधम् नित्यमनित्यंचपर
माणुरूपंनित्यं द्व्यणुकादिसर्वमनित्यं अवयवसमवेतंच अनित्यमपित्रि विधम् शरी
रेंद्रियविषयभेदात् पृथिवीतोयोविशेषस्तमाह किंतुदेहमयोनिजम् जलीयंशरीर
मयोनिजमित्यर्थः तच्चवरुणलोकेप्रसिद्धं इंद्रियंरसनंज लीयमित्यर्थः तथाहि रस
नेजलीयंगंधाद्यव्यंजकत्वेसतिरसव्यंजकत्वात् शाक्तरसाभिव्यंजकोदकवत् रसनस

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

न्याम
१९

न्निकर्षेव्यभिचारवारणायद्रव्यत्वंदेयम् सिंधुर्हिमादिर्विषयोमतः ४१ सिंधुःसमुद्रः हिमं
तुषारः आदिपदात्सरितकासारकरकादिः सर्वोग्राह्यः नचहिमकरकयोः कठिनत्वा
त्पार्थिवत्वमितिवाच्यम् उष्मणाविलीनयोस्तयोर्जलत्वस्यप्रत्यक्षसिद्धत्वात यद्द्र
व्यंयद्द्रव्यध्वंसजन्यमितिव्याप्तेर्जलोपादानोपादेयत्वसिद्धेः अदृष्टविशेषेणद्रवत्वप्र
तिरोधानात्करकायांकाठिन्यस्यभ्रांतत्वात् तेजोनिरूपयति स्पर्श उष्णस्तेजसस्तुरूपंच शु जसस्तुप
नि५ क्लंभास्वरम् उष्णत्वस्पर्शेरूपोजातिविशेषः प्रत्यक्षसिद्धः इत्थंचतेजोष्णस्पर्शसमवायि
कारणतावच्छेदकतयातेजस्त्वंजातिविशेषः तस्यपरमाणुवृत्तित्वंतजलत्वस्येवानसंदे
यम् नचोष्णस्पर्शवत्वंचंद्रकिरणादावव्याप्तमितिवाच्यम् तत्राप्युष्णस्यसत्वात्किं राम
तुतदंतःपातिजलस्पर्शेनाभिभवात्अग्रहः एवंरत्नकिरणादौपार्थिवस्पर्शे १९

ते३

नाभिभवाच्चक्षुरादौ चानुद्भूतत्वादग्रहः। रूपमिति वैश्वानरमरकतकिरणादौ पार्थि
वरूपेणाभिभवाच्छुक्लरूपाग्रहः। तद्रूपाग्रहणे धर्मिणोपि चाक्षुषत्वं न स्यादिति चेन्न अ
न्यदीयरूपेणैव धर्मिणो ग्रहणसंभवात् शंखस्येव पित्तपीतिम्ना वह्नेस्तु शुक्लरूपं नाभि
भूतं किं तु तदीयं शुक्लत्वमभिभूतमित्यन्ये नैमित्तिकं द्रवत्वं तु सुवर्णादिरूपे तेजसि त
त्त्वात् न च नैमित्तिकं द्रवत्वं दहनादावव्याप्तं घृतादावतिव्याप्तमिति वाच्यम् पृथिव्यवृ
त्तिनैमित्तिकद्रवत्ववृत्तिजातिमत्त्वस्य विवक्षितत्वात् नित्यत्वादि च पूर्ववत् ५२ जलस्ये
वेत्यर्थः। तथा हि तद्द्विविधम् नित्यमनित्यं च परमाणुरूपं नित्यं तदन्यदनित्यमवयवि
वि च तच्च त्रेधा शरीरेन्द्रियविषयभेदात् शरीरमयोनिजमेवेत्यर्थः। तच्च सूर्यलोकादौ प्र
सिद्धम् अनयोर्विशेषमाह इन्द्रियं नयनं चक्षुस्तैजसं परकीयस्पर्शाद्यव्यंजकत्वे सति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

परकीयरूपव्यंजकत्वात्प्रदीपवत् प्रदीपस्य स्वीयस्पर्शव्यंजकत्वादाद्यं परकीये।
ति घटादेः स्वीयरूपव्यंजकत्वात् व्यभिचारवारणाय द्वितीयं परकीयेति अथवा प्र।
भायाः दृष्टांतत्वसंभवादाद्यं परकीयेति न देयम् चक्षुःसन्निकर्षे व्यभिचारवारणाय द्वि
तीयं देयम् 'विषयं दर्शयति' वह्निः सुवर्णादिर्विषयो मतः ननु सुवर्णस्य तैजसत्वे किं
मानमिति चेन्न सुवर्णं तैजसं असति प्रतिबंधके अत्यंतानलसंयोगेप्यनुच्छिद्य
मानद्रवत्ववत्वात् यन्नैवं तन्नैवं यथा पृथिवी न चाप्रयोजकम् पृथिवीद्रवत्वस्य जल
द्रवत्वस्य चाग्निसंयोगनाश्यत्वात् ननु पीतिमगुरुत्वाश्रयस्य पार्थिवस्यापि तदानीं
द्रुतत्वात्तेन व्यभिचार इति चेन्न जलमध्यस्थमसीदेद्रवत्वस्याद्रवत्वात् अपरे तु पीति
माश्रयस्यात्यन्तवह्निःसंयोगेपि पूर्वरूपापरावृत्तिदर्शनात् प्रतिबंधके विजातीय

द्रव्यंकल्प्यते तथाहि अग्निसंयोगीपीतिमगौरुत्वाश्रयः विजातीयरूपप्रतिबंधकद्रव्य द्रव्यसं
युक्तः अत्यंताग्निसंयोगेपिपूर्वरूपविजातीयरूपानधिकरणत्वात् तप्तजलमध्यस्थपीत
पटवत् तस्यचपृथिवीजलभिन्नस्यतेजस्त्वनियमात् वायुंनिरूपयति अपाकजोनुष्णा
शीतः स्पर्शस्तुपवनेमतः ४३ अनुष्णाशीतस्पर्शस्यपृथिव्यामपिसत्वादुक्तमपाकजइति
अपाकजस्पर्शस्यजलादावपिसत्वादुक्तमनुष्णाशीतइति एतेनवायवीयोविजा
तीयःस्पर्शोदर्शितः तज्जनकतावच्छेदकंवायुत्वमितिभावः तिर्यग्गमनवानेषःज्ञेयःस्पर्शा
दिलिंगकः एषवायुःस्पर्शादिलिंगकः वायुर्हिस्पर्शशब्दधृतिकंपैरनुमीयतेविजातीयस्य
र्शेनविलक्षणशब्देनतृणादीनांधृत्याशाखादीनांकंपेनचवायोरनुमानात् यथाचवा
युर्नप्रत्यक्षस्तथाग्रेवक्ष्यते पूर्ववन्नित्यताद्युक्तम् वायुर्हिद्विविधोनित्योनित्यश्च परमाणुरू
पोनित्यस्तदन्योनित्यः समवेतश्च सोपित्रिविधः शरीरेंद्रियविषयभेदात् तत्रशरीरम

न्याम
२१

योनिजं पिशाचादीनां परं तु जलीयतैजस [illegible] वायवीयशरीराणां पार्थिवभागोप
ष्टंभादुपभोगक्षमत्वं जलादीनां प्राधान्याज्जलीयत्वादिकमविरुद्धं 'अथ वायोर्विशेषमाह
'देहव्यापि त्वगिंद्रियम् ॥४४॥ शरीरव्यापि स्पर्शग्राहकमिंद्रियं त्वक् तच्च वायवीयम् रूपा
दिषु पंचसु मध्ये स्पर्शस्यैव व्यंजकत्वात् अंगसंगिसलिलव्यंजकव्यजनवायुवत् 'वि	शैत्य
षयं दर्शयति' प्राणादिस्तु महावायुपर्यंतो विषयो मतः 'यद्यप्यनित्यो वायुश्चतुर्विधस्तस्य
चतुर्थी विधा प्राणादिरित्युक्तमाकरे तथाप्युपसंक्षेपाद्वैविध्यमुक्तम् प्राणस्त्वेक एव हृ
दादिनानास्थानवशान्मुखनिर्गमनादिनानाक्रियावशाच्च नानासंज्ञां लभते 'आका
शं निरूपयति' आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः ॥४५॥ आकाशकालदिशामे
कैकव्यक्तित्वादाकाशत्वादिकं तु न जातिः किं त्वाकाशत्वं शब्दाश्रयत्वं वैशेषिक इति क	राम
थनं तु विशेषगुणान्तरव्यवच्छेदाय एतेन प्रमाणमपि दर्शितम् तथा हि श [illegible] ब्दो गुणः	२१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चक्षुर्ग्रहणायोग्यवहिरिंद्रियग्राह्यजातिमत्वात् स्पर्शवत् शब्दो द्रव्यसमवेतो गुणत्वात् संयोग
वदित्यनुमानेन शब्दस्य द्रव्यसमवेतत्वे सिद्धे शब्देन स्पर्शवत् विशेषगुणः अग्निसंयो
गासमवायिकारणकत्वाभावे सति अकारणगुणपूर्वकप्रत्यक्षत्वात् सुखवत् पाकज
रूपादौ व्यभिचारवारणाय सत्यंतम् पटरूपादौ व्यभिचारवारणाय अकारणगुणपूर्वकेति
जलपरमाणुरूपादौ व्यभिचारवारणाय [illegible] पूर्वकेति शब्देन दिक्कालमनसां गुण
णः विशेषगुणत्वात् रूपवत् नात्मविशेषगुणः वहिरिंद्रिययोग्यत्वात् रूपवत् इत्थं च श
शब्दाधिकरणं नवमं द्रव्यं गगननामकं सिध्यति न च वायोरवयवेषु सूक्ष्मशब्दक्रमेण कार
णगुणपूर्वकशब्द उत्पद्यतामिति वाच्यम् अयावत् द्रव्यभावित्वेन वायोर्विशेषगुणत्वा
भावात् तत्र च शरीरस्य विषयस्य चाभावात् 'इंद्रियं दर्शयति' 'इंद्रियं तम् भवेद्भ्राडम्' नन्वा

उकायत्वाद्विभिन्नंप्रतिनिमित्तकारणमित्यर्थः अत्र कालिकसं

दा१

न्याम काशंर्लाघवादेकं सिद्धं श्रोत्रं पुरुषभेदभिन्नं कथमाकाशं स्यादत आह॥ एकः सन्नप्युपाधितः॥

२२ आकाश एकः सन्नप्युपाधेः कर्णशष्कुल्यादिभेदाद्भिन्नं श्रोत्रात्मकं भवतीत्यर्थः॥ का

लं निरूपयति॥ जन्यानां जनकः कालः॥ तत्र प्रमाणं दर्शयितुमाह॥ जगतामाश्रयो मतः॥

कालः सर्ववानितिप्रतीत्या सर्वाधिकरणत्वेन कालसिद्धिरिति भावः ३॥=

ध इति तथाहि इदानीं घट इत्यादिप्रतीतिः सूर्यपरिस्पंदादिकं यदि विषयीकरोति तदा सूर्यपरिस्पं

दादिना घटादेः संबंधो वाच्यः स च संयोगादिर्न भवतीति काल एतत्संबंधघटकः कल्प्यते इ

त्यं च तस्याश्रयत्वम् समस्त प्रमाणांतरं दर्शयति॥ परापरत्वधीहेतुः॥ परापरत्वबुद्धेरसाधारणं

संयोगाश्रय

निमित्तं काल एव परापरत्वयोरसमवायिकारणं तयोर्लाघवादतिरिक्तः काल एव कल्प्यते

इति भावः॥ नन्वेकस्य कालस्य सिद्धौ क्षणदिनमासवर्षादिसमयभेदो न स्यादत आह॥ क्षणा राम

क्रिया

दिः स्यादुपाधितः॥ कालस्त्वेकोऽप्युपाधिभेदात् क्षणादिव्यवहारविषयः॥ उपाधिस्तु स्वजन्यवि २२

भागप्रागभावावच्छिन्नकर्म पूर्वसंयोगावच्छिन्नविभागो वा पूर्वसंयोगनाशावच्छिन्नोत्तरसंयो
गप्रागभावो वा उत्तरसंयोगावच्छिन्नकर्म वा न चोत्तरसंयोगानंतरं तत्क्षणव्यवहारो न स्यादिति
वाच्यम् कर्मांतरसत्वात् महाप्रलये तत्क्षणादिव्यवहारो यद्यस्ति तदा अनायत्या ध्वंसेनोप
पादनीयः दिनादिव्यवहारस्तु तत्क्षणकूटैरिति दिशं निरूपयति दूरांतिकादिधीहेतुरे
कानित्या दिगुच्यते ४६ दूरत्वमंतिकत्वं च दैशिकं परत्वमपरत्वं च बोध्यम् तदुभयेरसाधारणं
बीजं दिगेव दैशिकपरत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतया दिक्सिद्ध्यतीति भावः
नन्वेकैव दिक् यदि तदा प्राचीप्रतीच्यादिव्यवहारः कथमुत्पद्यतामत आह उपाधि
भेदादेकापि प्राच्यादिव्यपदेशभाक् यत्पुरुषस्योदयगिरिसन्निहिता या दिक् सा तत्पु
रुषस्य प्राची एवमुदयगिरिव्यवहिता प्रतीची तत्पुरुषस्य मेरुसन्निहिता दिगुदीची।

महाप्रलये तत्क्षणादिव्यवहारो नास्त्येव अस्ति चेत्तदा अनायत्या आवश्यकत्वात् ध्वंसतत्क्षणादारभ्य तत्क्षणादिव्यवहारः स्यात् ३

२ सुखदुःखादीति आदिना ज्ञानेच्छाद्वेषप्रयत्नधर्माधर्मभावनापरिग्रहः यद्यात्मत्वस्यान्यात्मन्यप्रत्यक्षत्वेपि स्वात्मनि स्वरूपतो मानसप्रत्यक्षविषयत्वमस्त्येव तथापि स ... लात्मसाधारणानुगतप्रत्यक्षासंभवे न जातिरूपं तन्न सिद्ध्यत्यनेकसमवेतत्व घटितजातित्वस्य हेतुः अनेकव्यक्तिस्य हेतुत्वस्य सर्वसिद्धत्वादित्यनुमानमेव तत्र प्रमाणमित्यभिप्रायेण सुखादिकार एतावच्छेदकतयात तत्सिद्धिः प्रदर्शिता २ ननु तर्हि आत्मनि सुखाद्युत्पत्तिः कुतो न संभवतीत्यत आह अदृष्टादीति आदिना शरीरपरिग्रहः ३

ननु तथा ... त्मत्व जातेर्भगवदात्मसाधारण्ये मानाभाव इत्यत आह ईश्वरे इति आत्मावारे २३ द्रष्टव्य इत्यादिश्रुता वात्मपदव्यवहारादिति भावः ३

नमो न्याम

एवं व्यवधाने सत्यवाची सर्वेषामेव वर्णानामेरूत्तरतः स्थित इति नियमात् आत्मानं निरूपयति आत्मेंद्रियाद्यधिष्ठाता आत्मत्व जातिस्तु सुखदुःखादिसमवायिकारणतावच्छेदकतया सिद्ध्यति ईश्वरेपि सा जातिरस्त्यदृष्टादिकारणाभावान्न सुखाद्युत्पत्तिः नित्यस्य स्वरूपयोग्यस्य फलावश्यंभावस्त्वस्याप्रयोजकत्वात् अपरे ईश्वरे सा जातिर्नास्त्येव प्रमाणाभावात् न च दशमद्रव्यत्वापत्तिः ज्ञानवत्वेन विभजनादित्याहुः इंद्रियाणां शरीरस्य च परंपरया चैतन्यसंपादकः यद्यप्यात्मन्य हं जाने अहं सुखीत्यादिप्रत्यक्षविषयत्वमस्त्येव तथापि विप्रतिपन्नं प्रति प्रथमत एव शरीरादिभिन्नस्तत्प्रतीतिगोचर इति प्रतिपादयितुं न शक्यत ... इत्यतः प्रमाणांतरं दर्शयति करणं हि सकर्तृकम् ४८ वास्यादीनां छिदादिकरणानां कर्तारमंतरेण फलानुपधानं दृष्टं एवं चक्षुरादीनां ज्ञानकरणानामपि कर्तारमं फलोपधानं नोपपद्यत इत्यतिरिक्तः कल्प्यते ननु शरीरस्यैव कर्तृत्वमस्तु तत्र आह शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः ननु १

ननु तथापि नित्यस्य स्वरूपयोग्यस्य फलावश्यंभाव इति नियमेनेश्वरस्य स्वरूपयोग्यस्य फलोपधानापत्तिरित्यत आह नित्यस्येति ३

राम
२३

तेरेण २

२अनुभवाश्रयस्य बालशरीरस्य तदानीमभावादितिभावः२

न२ चैतन्यंज्ञानादिकमेवमनुक्तात्मनांत्वन्मतइवमृतशरीराणामपितदभावेकाक्षतिः॥ प्राणाभावे
नशौभावस्यसिद्धेरितिचेन्न॥ शरीरस्यचैतन्येबाल्येविलोकितस्यस्थाविरेस्मरणानुपपत्तेः
३ननुबाल्यशरीरंतदाश्रयेपि त्पत आह शरीराणामिति — शरीराणामवयवोपचयापचयैरुत्पादविनाशशालित्वात्॥ नचपूर्वशरीरोत्पन्नसंस्का रे१ (वृद्धिः नाशः)
णाद्वितीयशरीरेसंस्कारउत्पाद्यतइतिवाच्यम्॥ अनंतसंस्कारकल्पनेगौरवात्॥ किंचशरीर
पनस्यादित्यत्रहेतुमाहइष्टेति — स्यचैतन्येबालस्यस्तनपानेप्रवृत्तिर्नस्यात् इष्टसाधनताज्ञानस्य(प्रवृत्ति)तद्धेतुत्वात् तदानीमिष्टसा — ५स्तनपानप्रवृत्त्यव्यवहितपूर्वकालेप
(ऽनुभविता) धनता२नुभाविकाभावात् मन्मतेतुजन्मांतरानुभूतेष्टसाधनत्वस्यतदानींस्मरणादेवप्रवृत्तिः
इष्टसाधनादपीत्यर्थः ३ — नचजन्मांतरानुभूतंअन्यदपिस्मर्यतेतिवाच्यम् उ द्बोधकाभावात् संस्कारनाशाद्वा अत्र — ३स्तनपानप्रवृत्त्यनुकूलेष्ट साधनतास्मरणेन
तुजीवनान्यथानुपपत्त्याजीवनादृष्टस्योद्बोधकत्वकल्पनात् (इत्यर्थः) एवंपूर्वपूर्वजन्मस्वपितत्पूर्व
पूर्वजन्मानुभूतंस्मर्यतइत्यनादित्वसिद्धेः अनादिभावस्यना शानुपपत्तेस्तस्मान्नित्य

प२

७ ननु इंद्रियांतरेणैव स्मरणं भवि ष्यतीत्यत आह अन्येनानुभूतस्येति॥ विभिन्नाधिकरणवृत्तिनि१

न्याय

२७

५ यद्यपि व्यधिकरणयोः कार्यकारणभावविरहान्न सामानाधिकरण्येन तत्र क्षतिर्विफलात्तथापि यत्र विषयतासंबंधेन स्मृतिस्तत्र विषयतासंबंधेनानुभवइतीदृश विषयघटितत्व सामानाधिकरण्यप्रत्यासत्त्या कार्यकारणभाव आवश्यकः आत्मनिष्ठसमानाधिकरण्यघटितकार्यकारणभावेन घटानुभवोत्तरं विषयतासंबंधेन स्मृत्यापत्तेर्वारणादित्यतः कर्तृकानुभवस्य घटेत्वादिद्रियांतर कर्तृकं स्मरणं त्वनुपपन्नमित्याशंकानिराकरणपरतयोक्तिः ५

त्वं सिद्ध्यति ननु चक्षुरादीनां ज्ञानादौ करणत्वं कर्तृत्वं चास्तु विरोधे बाधकाभावादत आह तथात्वे चेदिंद्रियाणामुपघाते कथं स्मृतिः ४८ तथात्वं चैतन्यत्वमित्यर्थः उपघातेनाशे सति अर्थाच्चक्षुरादीनामेव कथमिति पूर्वं चक्षुरादिसाक्षात्कृतानां चक्षुराद्यभावे स्मरणं न स्यात् अनुभवितुरभावादन्यस्यानुभूतस्यान्येन स्मरणासंभवात् अनुभवस्मरणयोः सामानाधिकरण्येन कार्यकारणभावादिति भावः ननु चक्षुरादीनां चैतन्यं मास्तु मनसो नित्यत्वाच्चैतन्यमस्त्वित्यत आह मनोपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत् न तथा न चेतनं मनस इत्यन्ये ज्ञानादिकं प्रत्यक्षं न स्यात् अणुधर्मत्वात् प्रत्यक्षे महत्त्वस्य हेतुत्वात् यथा च मनसो ऽणुत्वं तथावक्ष्यते नन्वस्तु विज्ञानमेवात्मा तस्य स्वतःप्रकाशत्वा च्चेतनत्वं ज्ञानसुखादिकं तस्यैवाकारविशेषः तस्यापि भावत्वादेव क्षणिकत्वं पूर्वपूर्वविज्ञानं द्विविधं विज्ञानं प्रवृत्तिविज्ञानमालयविज्ञानं च तत्र आयं घट इति प्रवृत्तिविज्ञानं अहमिति ज्ञानमित्यालयविज्ञानं तदेवास्माकं तस्य विज्ञानस्य। ननु सुषुप्तावात्मा न सिद्ध्यति एकैकोत्पन्नविज्ञानस्य तु क्षणिकत्वेन नाशात् विज्ञानांतरस्य च तदानीमुत्पादकाभावात् अत आह

२ विज्ञानवादी शंकते नन्विति। आत्मनि रूपणस्य प्रसक्तत्वात् आत्मैव तु कोवस्तुमात्रस्यैव न मते विज्ञानस्यादित्येतेधर्म२

राम

२५

विर मनसि ज्ञानसुखादिसत्वे तत्प्रत्यक्षानुपपत्तेरित्यर्थः३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

३ विज्ञानस्य जगद्विषयत्वं यत्किंचिद्विषयत्वं वाभिप्रेतमिति विकल्प्याद्ये दूषणमाह।
तस्येति विज्ञानस्येति ३

नन्नु विज्ञानस्य क्षणिकत्वे
न तदाश्रितसंस्कारस्यापि क्ष
णिकत्वात् कालांतरे स्मरणं
न स्यादित्याशंकां परिह
रति सुगामेदेति १

नस्योत्तरोत्तरविज्ञानहेतुत्वात् सुषुप्तावपि आलयविज्ञानधारा निराबाधैवं ग्रामदवास

वा नोऽस्तित्ववसनइव पूर्वपूर्वविज्ञानजनितसंस्काराणां उत्तरोत्तरविज्ञाने संक्रांतत्वान्ना

६ अतः स्वरूपविज्ञानस्य
सविषयत्वे दूषणमाह
सुषुप्ताविति ४

५ प्रकाशकत्वे ज्ञानत्वे ज्ञान
त्वस्य विषयता व्याप्यत्वा
दिति भावः ५

नुपपत्तिः स्मरणादेरिति चेन्न तस्यैद्विषयत्वे सार्वज्ञापत्तिर्यत्किंचिद्विषयत्वे विनिगमना

जग

विरहात् सुषुप्तावपि विषयाभासप्रसंगाच्च तदानीं निराकारा चित्संततिरनुवर्त्तत इति

चेन्न तस्याः प्रकाशकत्वे प्रमाणाभावात् अन्यथा घटादीनामपि ज्ञानत्वापत्तिः न चे

ष्टापत्तिः विज्ञानव्यतिरिक्तवस्तुनोऽभावादिति वाच्यम् घटादेरनुभूयमानस्यापलपि

तुमशक्यत्वात् आकारविशेष एवायं विज्ञानस्येति चेत् किमयमाकारोऽतिरिच्यते विज्ञा

नान्नहि समायातं विज्ञानस्य व्यतिरेकेणानातिरिच्यते चेत्तर्हि समूहालंबने नीलाकारो

ऽपि पीताकारः स्यात् स्वरूपतो विज्ञानस्याविशेषात् अपोहरूपो नीलत्वादिर्विज्ञानधर्म

शंकते तदानीमिति निर्वि
षया चित्संततिर्विज्ञान
संततिः ७

प्रमाणाभावे पि तत्व
ज्ञानत्वस्वीकारे ८

अतद्व्यावृत्तिः अपोहरूपोऽपणा
नीलेतराभावो नीलत्वम् १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इति चेन्न नीलत्वादीनां विरुद्धानां एकस्मिन्नसमवेशात् इतरथा विरोधावधारणस्यैव
दुरुपपादत्वात् नवा वासनासंक्रमः संभवति मातृपुत्रयोरपि वासनासंक्रमप्रसंगा
त् न चोपादानोपादेयभावो नियामक इति वाच्यम् वासनायाः संक्रमं संभवत् उत्तरस्मि
न्नुत्पत्तिरेव संक्रम इति चेन्न तदुत्पादकाभावात् चितामेवोत्पादकत्वे तदासंस्कारानंत्य
प्रसंगः क्षणिकविज्ञानेऽतिशयविशेषः कल्प्यते इति चेन्न मानाभावात् कल्पनागौर१
वाच्च एतेन क्षणिकशरीरेष्वेव चैतन्यमपि प्रत्युक्तम् गौरवादतिशये मानाभावाच्च बीजा
दावपि सहकारिसमवधानासमवधानाभ्यामेवोत्पत्त्यनुत्पत्त्योः कुर्वद्रूपत्वाकल्पनात् अस्तु
तर्हि क्षणिकविज्ञाने गौरवान्नित्यविज्ञानमेवात्मा अविनाशी वा अरेऽयमात्मा सत्यं ज्ञानमनंतं
ब्रह्मेत्यादेः श्रुतेरिति चेन्न तस्य सविषयत्वासंभवस्य दर्शितत्वात् निर्विषयत्वस्य ज्ञानत्वे

ननु देशस्य वीजादंकुरो
त्पत्तिर्न कुसूलस्य वीजादतो
ऽकुरत्वावच्छिन्नप्रति कुर्वद्रूप
त्वेन हेतुत्वमंगीक्रियते कुर्व
द्रूपत्वं चांकुरजनकतावच्छे
दकतया सिद्धो जातिवि
शेषः स च फलोपधायक
क्षणिकसमर्थवीजमात्र
वृत्तिवीजत्वव्याप्यः कल्प्यते
एवमत्रापि कुर्वद्रूपत्वेनैव
क्षणिकशरीरेषूत्तरोत्तर
शरीरनिष्ठवासनोत्पादकत्वं
वाच्यमत आह वीजादावपी
ति १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सं१ ननु जीवस्य जगद्विषयत्वं वा नियतयत्किंचि
द्विषयत्वं वा भ्रमः परं तु यद्विषयकत्वं यत्र जीवे
त३ तु भवति सिद्धं तत्तद्विषयकत्वमत आह स
विषयकत्वस्येति १ ननु सत्यं ज्ञानमिति श्रुतिरेव जीवस्य ज्ञानस्वरूपत्वे प्रमाणमत आह सत्यमिति २

कश्चित्संसारी कश्चिन्मुक्त
इति व्यवस्थानुपपन्ना स्यादि
ति भावः चैतन्ये नात्मनो रो
मरूपयोरैक्यात् २
२१

मानाभावात् सविषयत्वाप्यनुभवात् सुषुप्तावपि विषयाभासप्रसंगाच्च अतो ज्ञान
भिन्नो नित्य आत्मेति सिद्धं सत्यं विज्ञानमिति ब्रह्मपरं जीवविभुत्वे नोपयुज्यते ज्ञानाज्ञा
नसुखित्वादिभिर्जीवानां भेदसिद्धोस्तु तराम् ईश्वरे भेदः अन्यथा बंधमोक्षानुपप ईश्वरस्य जीवात्मकत्वे ३
त्तेः योपीश्वराभेदबोधको वेदः सोपि तदभेदेन तदीयत्वं प्रतिपादयन्स्तौति अभे
दभावनयैव यतितव्यमिति वदति अत एव सर्वे एवात्मानः समर्पिता इति श्रूय१
कस्यचिन्मतं खंडयति मो तेत्यादिना ३ ते मोक्षदशायाम् अज्ञाननिवृत्तावभेदो जायत इत्यपि न भेदस्य नित्यत्वेन नाशायो
गात् भेदनाशेपि व्यक्तिद्वयं स्याद् अस्त्येव न च द्वित्वमपि नश्यतीति वाच्यम् तव नि
धर्मके ब्रह्मणि सत्यत्वाभावेपि सत्यस्वरूपं तद्वित्वद्वित्वाभावे द्वयात्मकोतावित्ति

वि१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

न्याम २६

स्वव्यत्वात् मिथ्यात्वाभावोधिकरणात्मक स्तत्रसत्यत्वमिति चेत् एकत्वाभावो व्यक्ति द्वया
त्मको [illegible] द्वित्वमित्यप्युच्यतां प्रत्येकमेकत्वेपि पृथिवीजलयोर्न गंधइतिवदुभयं नैक
मोक्षद = साम्य
मित्यस्य सर्वजनसिद्धत्वात् योपि तदानीमभेदप्रतिपादक आगमः सोपि निर्दुःखत्वादिना
भेदादेव
साम्यं प्रतिपादयति संपदाधिक्ये पुरोहितोयं राजा संवृत्त इतिवत् अतएव निरंजनः प
रमं साम्यमुपैतीति श्रूयते ईश्वरोपि न ज्ञानस्वरूपात्मा किं तु ज्ञानाद्याश्रयो नित्यं
नं ४ विज्ञानमानंदं ब्रह्मेत्यादौ विज्ञानपदेन विज्ञानाश्रय एवोक्तो यः सर्वज्ञ इत्याद्य
विरोधेनानंदमित्यस्यानन्दवदित्यर्थः अर्शआदित्वान्मत्वर्थीयोच् अन्यथा पुंलिं
गाप्रवृत्तेः आनंदोपि दुःखाभावे उपचर्यते भाराद्यपगमे सुखी संवृत्तोहमितिवत् ॥
अस्तु वा तस्मिन्नानंदो न तु स आनंदः असुखमिति श्रुतेः न विद्यते सुखं यस्येति कृतेना

अर्शआद्यर्थे मतुप् अर्शआदिभ्योऽच् मत्वर्थे भवः मत्वर्थीयः ३

लक्षणकल्पनमेव तत्वदोषइत्यत आह अस्तु वेति १

१ असुखमित्यत्र न वा ब्रह्मणि सुखभेदबोधनादिति भावः १

राम २६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

बहुव्रीहावन्यपदार्थलाभे यंनञ्‌
सा चलक्षणापत्तेरित्यर्थः १

आनंदशब्दस्य पुल्लिंगत्वमिति नियमे ना-
नंदमिति रूपस्य मत्वर्थीयाच्प्रत्ययं वि-
नानुपपत्तेरिति भावः १

सांख्यमतं दूषयितुमुपन्यस्यति
एतेनेति पूर्वोक्त युक्त्या आत्मनि ज्ञान-
वत्त्वसाधनेन वक्ष्यमाणयुक्त्या
चेत्यर्थः २

ननु कारणसत्त्वाद्बुद्धित्वप्रसिद्धि-
रित आह कार्यकारणयोरिति मित्यर्थः
मूलप्रकृतिः २

र्थ इति चेन्न लिंगव्यत्ययकल्पनापत्तेः प्रकरणविरोधाच्च "आनंद मत्वर्थीयाच् प्रत्ययविरोधेति" आ-
नंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेत्यत्र भेदस्य स्पष्टत्वादिति संक्षेपः " एतेन प्रकृतिः कर्त्री
पुरुषः पुष्करपलाशवन्निर्लेपः किं तु चेतनः कार्यकारणयोरभेदात् कार्यनाशे सति कार्य दू-
पतया नाशोऽपि स्यादित्यकारणत्वं तस्य "बुद्धिगतचैतन्याभिमानान्यथानुपपत्त्या तत्कल्प्य-
नम् बुद्धिश्च प्रकृतेः परिणामः सैव महत्तत्त्वमंतःकरणमित्युच्यते तत्सत्त्वासत्त्वाभ्यां पुरु-
षस्य संसारापवर्गौ तस्या एवेंद्रियप्रणालिकया परिणतिर्ज्ञानरूपा घटादिना संबंधः पुरु-
षे कर्तृत्वाभिमानो बुद्धौ चैतन्याभिमानश्च भेदाग्रहात् ममेदं कर्तव्यमिति मदंशः पुरु-
षोपरागो बुद्धेः स्वच्छतया तत्प्रतिबिंबादतात्त्विको दर्पणस्येव मुखोपरागः इदमिति विषयो-
परागः इंद्रियप्रणालिकया परिणतिभेदस्तात्त्विकः निश्वासाभिहतदर्पणस्येव मलि-

यथा पद्मपत्रमंभसा लि-
प्तं न भवति तथा पुरुषः क-
र्तृत्वाद्याश्रयो न भवति इ-
ति भावः तथा च पुरुषः क-
र्तृत्वाभाववान् कारणत्वा-
भावात् इत्यनुमानं तत्र प्रमा-
णम् ३

ननु पुरुषे साक्षात्संबंध ए-
व विषयोस्तु स एव चतस्मि-
न् संसारनियामकोस्तु कि-
मुक्तिबुद्धिघटितपरंपरा
संबंधेनेत्यत आह तस्या
एवेति ४

नन्वेतादृशपुरुषसत्त्वे
किं मानमत आह कि-
चित् प्रसिद्धस्यैव चैतन्य-
स्य बुद्धावारोपसंभवात् ४
बुद्धिः पुरुषसंबंधवती
साक्षात् चैतन्याभावे स-
ति चैतन्याभिमानित्वा-
त् यत्र पुरुषसंबंधो नास्ति
तत्र साक्षात्संबंधाभावे
सति चैतन्याभिमानम-
प्यस्ति यथा घटः ५

इंद्रियप्रणालिकया इंद्रियद्वारा परिणतिर्भेद
अयं घट इति ज्ञानरूपपरिणाम एव विशेष-
णबुद्धिसंबंधः १ प१

इदानीं बुद्धिगत उपलब्धेर्भे-
दः दर्शनाय बुद्धेरंशत्रयं द-
र्शयति ममेदमिति ३

ननु पुरुषस्य कर्तृत्वाभावे तत्र धर्माधर्मयोरुत्पत्त्यभावात्
तदधीनसुखदुःखयोरसत्त्वान्नित्यनोदुःखध्वंसरूपमोक्षः
पुरुषस्यादत आह तत्सत्त्वासत्त्वाभ्यामिति ५

लि

न्याम २७ निमा कर्त्तव्यमिति व्यापारावेशः तेनाशवद्यवती बुद्धिः न परिणामेन ज्ञानेन पुरुषस्या
तात्विकः संबंधः दर्पणप्रतिबिंबवन्मुखस्य मालिन्योपलब्धिरुच्यते ज्ञानवत्सुखदुःखेच्छाद्वेषप्र
यत्नधर्माधर्मा अपि बुद्धेरेव कृतिसामानाधिकरण्येन प्रतीतेः नच बुद्धिश्चेतना परिणामि
त्वादि इति मतमपास्तम् कृत्यदृष्टभोगानामिव चैतन्यस्यापि सामानाधिकरण्यप्रतीतेः त
कर्तृचेतनयोर्भेदांगी कारे दूषयति ५ द्विन्नसमानाभावा च चेतनोहं करोमीति प्रतीतेः चैतन्यांशे भ्रम इति चेत् कृत्यंशेपि किं नेष्यते
अन्यथा बुद्धेर्नित्यत्वे मोक्षाभावो ऽनित्यत्वे तत्पूर्वम संसारापत्तिः अचेतनायाः प्रकृतेः कार्य
१३ त्वाद्बुद्धेरचैतन्यं कार्यकारणयोस्तादात्म्यात् इति चेन्न असिद्धेः कर्तुर्जन्यत्वे मानाभावात् वीत
रागजन्मादर्शनात् अनादित्वे च अनादेर्नाशासंभवात् नित्यत्वं तत् किं प्रकृत्यादिकल्पने
न नच प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः अहंकारविमूढात्मा कर्ताहमिति म

अनित्यधर्माश्रयत्वादित्यर्थः ३ ति

राम २७

बुद्धेः प्रकृतिकार्यत्वाभावादिति भावः ३

प्रकृतिः प्रधानं सत्वरजस्तमसां गुणानां साम्यावस्था तस्याः प्रकृतेर्गुणैर्विकारैः कार्यकारणरूपैः क्रियमाणानि कर्माणि १

भगवद्वचनेनात्मकर्तृत्वाभाव उपपादितः १

न्यते इत्यनेन विरोध इति वाच्यम् प्रकृतेरदृष्टस्य गुणैरदृष्टजन्यैरिच्छादिभिः कर्ताहमेवेत्यस्यत
दर्थत्वात् तत्रैवं सति कर्तारमात्मानं केवलं तु य इत्यादि वदता भगवता प्रकटीकृतोयमुप
रिष्टादाशय इति संक्षेपः धर्माधर्माश्रयोध्यक्षः आत्मेत्यनुवर्तते शरीरस्य तदाश्रयत्वे देहां१ दे३
तरकृतकर्मणां देहांतरे भोगानुपपत्तेः विशेषगुणायोगतः २९ योग्यविशेषगुणसंबं
धेन आत्मनः प्रत्यक्षं भवति नत्वन्यथा अहं ज्ञानी अहं सुखीति प्रतीतेः प्रवृत्त्याद्यनुमे
योयं आत्मा परदेहादौ प्रवृत्त्यानुमीयते प्रवृत्तिरत्र चेष्टा ज्ञानेच्छाप्रयत्नादीनां देहेऽभाव
स्योक्तप्रायत्वात् चेष्टायाः प्रयत्नसाध्यत्वात् चेष्टया प्रयत्नवानात्माऽनुमीयत इति भा
वः अदृष्टोक्तमाह रथगत्येव सारथिः यद्यपि रथकर्म न चेष्टा तथापि रथकर्मणा रथ
स्य चेतनाधिष्ठितत्वमनुमीयते तथा चेष्टात्मकेन कर्मणा परात्मानुमीयत इति भावः१

३ शरीरस्य न चैतन्यमि
त्यनेनोक्तत्वादिति भावः

प्रतीतेरित्यत्र ज्ञाना
दिसंबंधप्रकारेणैवात्म
नः प्रत्यक्षानुभवसि
द्धत्वादित्यर्थः ५
आदिना प्राणादिमत्त्व
परिग्रहः ५

दृष्टांतासिद्धिमाशंक्य
निराकरोति यद्यपीति २

परकीयप्रवृत्त्यादेरतीन्द्रियत्वेन हेतुज्ञानासंभवात्
स्वरूपासिद्धेः आह प्रवृत्तिरत्रेति ४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

न्याय
२८

अहंकारस्याश्रयोयम् ॥ अहंकारो ऽहमिति धीस्तद्विषय आत्मा न शरीरादि ॥ मनो
मात्रस्य गोचरः ॥ मनोभिन्नेंद्रियाग्राह्यो मनोग्राह्यश्चेत्यर्थः ॥ विभुर्बुद्ध्यादिगुणवान् ॥
विभुत्वं परममहत्त्वं तच्च पूर्वमुक्तं अत्र स्पष्टार्थमुक्तं बुद्धिः सुखदुःखेच्छादयश्चतुर्द
शगुणाः पूर्वमुक्ता वेदितव्या अत्रैव प्रसंगाद्बुद्धेः प्रपंचं दर्शयति ॥ बुद्धिस्तु द्विविधा मता ॥
द्वैविध्यमुत्पादयति ॥ अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा ॥ अनुभवत्वं स्मृत्यन्य
ज्ञानत्वं स्मृतित्वं जातिविशेषः स्मरामीत्यनुव्यवसाय[illegible]सिद्ध[illegible]इति अनुभवत्वं जा
तिरित्यपि केचित् ॥ चतुर्विधेति ॥ प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे ॥ एतासां च
तसृणां चत्वारि करणानि प्रमाणानि प्रत्यक्षानुमानोपमानशाब्दाः प्रमाणानि

राम
२८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इंद्रियजन्यमिति इंद्रियजन्यत्वमिंद्रियरूपाद्रा
न २ वप्य स्तीत्यतोऽत्राममिति अनुमित्यादावति
व्याप्तिवारणायेंद्रियजन्यमिति १ लं १

इंद्रियजन्यत्वविशेषणे
दत्ते अनुमित्यादावतिव्या
प्तिस्तत्या दिंशाकेतपद्यपी
ति १ दवस्य १

नत्विंद्रियजन्यत्वाभावा
दीश्वरप्रत्यक्षेऽव्याप्तिर
त आह ईश्वरप्रत्यक्षं तु
इति तथा च जन्यप्रत्य
क्षमेव लक्ष्यमिति
भावः ३

इति सूत्रोक्तानि वेदितव्यानि इंद्रियजन्यज्ञानं प्रत्यक्षं यद्यपि मनोरूपेंद्रियजन्यं सर्व
मेव ज्ञानं तथापीन्द्रियत्वेन रूपेणेंद्रियाणां यत्र ज्ञाने करणत्वं तत्प्रत्यक्षमिति
विवक्षितं ईश्वरप्रत्यक्षं तु न लक्ष्यं इंद्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्य (निर्विकल्पकं)
(भ्रमाभिन्नं विशिष्टव्यवसायात्मकं)
भिचारि व्यवसायात्मकं प्रत्यक्षमिति सूत्रे तथैवोक्तत्वात् अथवा ज्ञानाकरणकं
ज्ञानं प्रत्यक्षं अनुमितौ व्याप्तिज्ञानस्य उपमितौ सादृश्यज्ञानस्य शाब्दबोधे पदज्ञा
नस्य स्मरणेऽनुभवस्य करणत्वान्न तत्रातिव्याप्तिः इदं लक्षणं ईश्वर(प्रत्यक्ष)साधारणं परा
मर्शाजन्यं ज्ञानमनुमितिः यद्यपि परामर्शप्रत्यक्षादिकं परामर्शजन्यं तथापि प

ननु तस्यैव लक्ष्यत्वे किं
मानमत आह इंद्रियार्थेति
२
ईश्वरप्रत्यक्षं त ज्ञानत्वस्ये
वाभिप्रेतत्वात् ४
ईश्वरप्रत्यक्षसंलक्ष्यत्व
माभिप्रेत्याह अथवेति ४
ज्ञानाजन्यमित्युक्तो चा
व्याप्तिः विशिष्टज्ञानमात्रस्य
विशेषणजन्यत्वादतो ज्ञान
करणकमिति अनुमित्या
दौ व्याप्त्यादिज्ञानस्य ५

प्रत्यक्षादिकमित्यादिना विशेषणतावच्छेदकप्रकारकनिश्चयविधया परामर्शज
क न्यस्य विशिष्टवैशिष्ट्यबोधस्य १
वह्निव्याप्यधूमवत्पर्वतवानयं दे
श इत्याकारकबोधस्य १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

धूमवान् पर्वतो वह्निमान् इ-
त्यनुमितौ पक्षताव[illegible]च्छे
दकविधया धूमस्य भाना
दिति भावः २

न्यायमु
२९ वं२

२ नन्वनुमितिं प्रत्यपि च न व्याप्ति
ज्ञानत्वेन करणं किंतु ज्ञान
त्वेन मनस्त्वेन वा एवमुप
मित्यादावपि मनस्त्वेनैव क
रणत्वं न च कार्यवैजात्य
नस्यादिति वाच्यम् साम
ग्रीवैलक्षण्यादेव तदुपपत्तेः
न च प्रमाणविभागानुपपत्तिः
क्रियाविशेषात् तदुपपत्तेरतः
पूर्वोक्तानुमित्यादिलक्षण
नामसंभव इत्यत आह वस्तु
त इति घटेति व्याप्तिवारणाय
इत्यंतं २ तत्वं च समवायेनाविव
क्षितं तेनानुमितौ कालिकेन
घटत्वस्य हानित्वेपि नातिव्याप्तिः

[illegible]

रामर्शजन्यं हेतुविषयकं ज्ञानमनुमितिः [illegible]
[illegible] नचैकदाचित् हेतुविषयकानुमितावव्या
प्तिरिति वाच्यम् तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् अथवा व्याप्तिज्ञान
करणकं ज्ञानमनुमितिः एवं सादृश्यज्ञानकरणकं ज्ञानमुपमितिः पदज्ञानकरणकं
ज्ञानं शाब्दबोधः वस्तुतो यत्किंचिदनुमितिव्यक्तिमादाय तद्व्यक्तिवृत्तित्वे सति यत्किंचि
त्प्रत्यक्षादिव्यक्तिमादाय तदवृत्तिजातिमत्त्वमनुमितित्वं एवं यत्किंचित्प्रत्यक्षादिव्यक्तिमादाय त
द्व्यक्तिवृत्त्यनुमित्यवृत्तिजातिमत्त्वं प्रत्यक्षत्वादिकं निर्वाच्यमिति जन्यप्रत्यक्षाणि वि
भजते घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतं ५२ घ्राणजं रासनं चाक्षुषं स्पार्शनं

राम
२९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्रावणं मानसमिति षड्विधं प्रत्यक्षम् न चैश्वरप्रत्यक्षस्याविभजनान्न्यूनत्वं वाच्यम् जन्यप्रत्य
क्षस्यैव निरूपणीयत्वात् उक्तसूत्रानुसारात्॥ घ्राणस्य गोचरो गंधः ग्राह्य इत्यर्थः॥ गंधत्वादिर
पि स्मृतः॥ आदिपदात्सुरभित्वादिपरिग्रहः गंधस्य प्रत्यक्षत्वात् तद्वृत्तिजातिरपि प्रत्यक्षा॥ गं
धाश्रयग्रहणेन घ्राणस्य न सामर्थ्यमिति बोध्यम्॥ तथा रसस्तोरसज्ञायास्तथा शब्दोपि च श्रु
तेः॥ रसत्वादिसहित इत्यर्थः तथा शब्दत्वादिसहितः गंधो रसश्चोद्भूतौ बोध्यौ॥ उद्भूतरूपं नयन
स्य गोचरो द्रव्याणि तद्वंति पृथक्त्वसंख्ये विभागसंयोग परापरत्वे स्नेहद्रवत्वं परिमाणयुक्तम्
५५ ग्रीष्मोष्मादावनुद्भूतं रूपमिति न प्रत्यक्षं तद्वंति उ[illegible]द्भूतरूपवंति॥ क्रिया जातिर्योग्यवृ
त्तिस्समवायश्च तादृशाः स्व[illegible]ह्लाति च त्वः संयोगादालोकोद्भूतरूपयोः ५५ पृथक्त्वादिक

स्वभावेनालोकसंयोगउद्भूत
रूपंचोभयोर्ग्रहणम् ३

व्यक्ति

आलोकसंयोगेतिएत
स्यचकारणत्वमंधका
रेचाक्षुषापत्तिवारण
यउद्भूतरूपस्यतुविशे
षादीनां—त्यक्षत्वावार
णायेत्यवधेयम् २

मपियोग्यवृत्तिबोध्यम् तादृशःयोग्यवृत्तिः चक्षुर्योग्यत्वमेवकथंतत्राह॥ गृह्णातीति॥
आलोकसंयोगउद्भूतरूपंचचाक्षुषप्रत्यक्षेकारणं तत्रद्रव्यचाक्षुषप्रतितयोः समवाय
संबंधेनकारणत्वंद्रव्यसमवेतप्रत्यक्षेस्वाश्रयसमवायसंबंधेनद्रव्यसमवेतसमवे
तस्यरूपादिः प्रत्यक्षेस्वाश्रयसमवेतसमवायसंबंधेनेति॥ उद्भूतस्पर्शवद्द्रव्यंगो
चरःसोपिचत्वचः॥ उद्भूतस्पर्शवद्द्रव्यंत्वचोगोचरः सोपिउद्भूतस्पर्शोपिस्पर्शत्वादिसहि
तइत्यर्थः॥ रूपान्यच्चाक्षुषेयोग्यंरूपमत्रापिकारणं ५६ रूपाभिन्नंरूपत्वादिभिन्नंचयच्चक्षु
षोयोग्यंतत्वगिंद्रियस्यापिग्राह्यत्वम् तथाचएपत्संयोगादक्षोयेचक्षुर्ग्राह्याःगुणा
उक्ताःएवंक्रियाएवंजातयोयोग्यवृत्तयश्चत्वचोग्राह्याइति अत्रापित्वगिंद्रिय

आदिनानीलत्वादीनांपरि
ग्रहः ४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

जन्यद्रव्यप्रत्यक्षे रूपं कारणं तथाच वहिरिंद्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणमिति नवीनास्तु वहिर्द्र
व्यप्रत्यक्षे न रूपं कारणं प्रमाणाभावात् किंतु चाक्षुषप्रत्यक्षे रूपं स्पार्शनप्रत्यक्षे च स्पर्शः कारण
मन्वयव्यतिरेकात् वहिरिंद्रियजन्यद्रव्यप्रत्यक्षतामात्रे किं कारणमिति चेन्न किंचित् आत्मावृ
त्तिशब्दभिन्नविशेषगुणवत्वं वा प्रयोजकमस्तु रूपस्य कारणत्वे लाघवमिति चेन्न वायोस्त्वगिं
द्रियेण ग्रहणप्रसंगात् इष्टापत्तिरिति चेत् उद्भूतस्पर्श एव लाघवात् कारणमस्तु प्रभा
या अप्रत्यक्षत्वे विव्यापत्तिरित्येव किं न स्यात्तस्मात्प्रभां पश्यामीति वद्वायुं स्पृशामीति प्रत्यय
सत्वाद्द्वयोरपि प्रत्यक्षं भवत्येव वहिर्द्रव्यप्रत्यक्षमात्रे न रूपस्य न वा स्पर्शस्य हेतुत्वं वायु
प्रभयोरेकत्वं गृह्यत एव कचित् द्वित्वादिकमपि कचित्संख्यापरिमाणग्रहो दोषादित्याहुः

(interlinear glosses: क; शंकते रूपस्येति; पुनः शंकते इष्टापत्तिरिति; उपसंहरति)

ननु कार्याभावे कारणाभाव स्य प्रयोजकतया गगनादौ वहिरिंद्रियजन्यप्रत्य

प्रतिवंधो नरूपेति उद्भूतेति ४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सुषुप्तौ ज्ञानाभावः कारणाभावप्रयुक्तः कार्याभावात् दंडाद्यभावप्रयुक्तघटाभाववत् २

न्याय मु

२१

ज्ञानजन्यसामान्ये

द्रव्याध्यक्षे त्वचो योगो मनसा ज्ञानकारणम् त्वङ्मनःसंयोगो ज्ञानसामान्ये कारणमित्य

प्रमालक्षि॰ सनुषज्यते २

र्थः किं तत्र प्रमाणं सुषुप्तिकाले त्वचं त्यक्त्वा पुरीतति वर्त्तमानेन मनसा ज्ञानाजननमि नर

ति ननु सुषुप्तिकाले किं ज्ञानं भविष्यति अनुभवरूपं वा स्मरणरूपं वा नाद्यः अनुभ

चक्षुरादीनाम मनोयोगाभावादेव ४

वसामग्र्यभावात् तथाहि प्रत्यक्षे चक्षुरादिना सह मनःसंयोगस्य हेतुत्वात् तदभावा

योग्यगुणसंबंधेनैवात्मनः प्रत्यक्षस्वीकारात् योग्यविशेषगुणप्रत्यक्षसामग्र्यंतर्गतस्य ज्ञानादेरभावादेवात्मप्रत्यक्षत्वमित्यर्थः ३

देव न चाक्षुषं प्रत्यक्षं भवति ज्ञानादेरभावादेव न मानसं प्रत्यक्षं ज्ञानाद्यभावे चात्मनो

नाभावा

पि न प्रत्यक्षमिति व्याप्तिज्ञानाभावादेव नानुमितिः सादृश्यज्ञानान्नोपमितिः पदज्ञाना

उद्बोधकस्य फलबलकल्पनत्वादिति भावः

भावान्न शाब्दबोधः इत्यनुभवसामग्र्यभावान्नानुभवः उद्बोधकाभावाच्च न स्मरणमेव राम

सुषुप्तिप्राक्कालोत्पन्नेच्छादिव्यक्तिसत्त्वसंबंधेनात्मनश्च प्रत्यक्षत्वप्रसंगात् तदंती

इच्छाया आदिरिति बुध्या ज्ञानमत्र विवक्षितम् १ अत्र ज्ञानादेर्न मानसमित्यन्वयः अभावादित्यत्रापि ज्ञानादित्यस्यान्वयो बोध्यः ५ २१

त्व

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ननु स्व... त्प्रिसा कालीनस्य ज्ञानस्य निर्विकल्पकद्रूपता
नदी... द्रियत्वमुभयवादिसिद्धमेवेति १

द्रिय... वेमानाभावात् सुषुप्तिप्राक्कालेनिर्विकल्पकमेव नियमेन जायते इत्यत्र प्रमा
णाभावात् अथ ज्ञानमात्रेत्वङ्मनःसंयोगस्य यदि कारणत्वं तत् दारासन चाक्षुषप्रत्य दि
त्तकालेत्वाचप्रत्यक्षं स्यात् विषयत्वक्संयोगस्यत्वङ्मनःसंयोगस्य च सत्वात् = तद्दशीकारे चाक्षुषमपि न स्यादितिभावः २
परस्परप्रतिबंधादेकं अपि न स्यादिति अत्र केचित् पूर्वोक्तयुक्त्या त्वङ्मनः
संयोगस्य हेतुत्वे सिद्धे चाक्षुषादिसामग्र्याः स्पार्शनादिप्रतिबंधकत्वं अनुभ
वानुरोधात्कल्प्यत इति अन्ये तु सुषुप्त्यनुरोधेन चर्ममनःसंयोगस्य ज्ञानहेतुत्वं कल्प्यं चा
... क्षुषादिप्रत्यक्षका... लेत्वङ्मनःसंयोगाभावान्नत्वाचप्रत्यक्षमिति ॥

ननु चाक्षुषादिसामग्र्याः स्पार्शनप्रतिबंधकत्वादेव न स्पार्शनं तत्रेत्यत आह परस्परेति ४

इत्थं च चाक्षुषादिकाले पूर्वोक्तस्पार्शनापत्तिरपि न भवतीत्याह चेदक्षुषादीति १

अनुभवस्य तथापि स्वरूसिततत्वादन्यथा दृव्यापत्त्यादिना त्वदुक्तासंसर्गत्वादितिभावः ३

मिश्रमतमाह

सुषुप्तौ ज्ञानानुत्पादलनिरोधेन २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

न्यायमु०
३२

मनोमात्रजन्येत्यर्थः प्रत्यक्ष

मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः ॥ ५७ मनोजन्यविषयताया इत्यर्थः
मतिर्ज्ञानं कृतिर्यत्नः एवं सुखत्वदुःखत्वादिकमपि मनोग्राह्यं एवं आत्मापि अ
अ मनोग्राह्यः किंतु मनोमात्रस्यागोचरः इत्यनेन पूर्वमुक्तत्वादत्र नोक्तम् ॥ ज्ञानं
यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते ॥ चक्षुःसंयोगाद्यनंतरं घट इत्याकारकं घ
टत्वादिविशिष्टं ज्ञानं न संभवति पूर्वं विशेषणस्य घटत्वादेर्ज्ञानाभावात् वि
शिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात् तथा च प्रथमतो घटघटत्व राम०
योर्वैशिष्ट्यानवगाह्येव ज्ञानं जायते तदेव निर्विकल्पकं तच्च न प्रत्यक्षं ८

निर्विकल्पके प्रमाणं दर्शयति चक्षुःसंयोगादीति

३२

निर्विकल्पकेमतोक्ता मतीन्द्रियत्वेसाधयति२

इतिघटाद्यवगाहित्वेनैव ज्ञानप्रत्यक्ता स्यानुभवसिद्धत्वादित्यर्थः१

घटमहंजानामीति प्रत्ययेपतत्रेति २

तथाचवैशिष्ट्यावगाहिज्ञानस्यप्रत्यक्षंनभवति घटमहंजानामीतिप्रत्यया
त तज्ञा[ने] य[न्नि]ज्ञानंप्रकारीभूयभासते ज्ञानेघटः तत्रघटत्वंप्रकारोयःसए
वविशेषणंइत्युच्यते विशेषणेयद्विशेषणंतद्विशेषणतावच्छेदकमित्युच्य
ते विशेषणतावच्छेदकप्रकारकंज्ञानंविशिष्टवैशिष्ट्यज्ञानेकारणं निर्वि
कल्पकेचघटत्वादिकंनप्रकारस्तेनघटत्वादिविशिष्टघटादिवैशिष्ट्यभानं
ज्ञानेनसंभवति घटत्वाद्यप्रकारकंचघटादिविशिष्टज्ञानंनसंभवति जात्या
तिरिक्तपदार्थज्ञानस्यकिंचिद्धर्मप्रकारकत्वनियमात्" महत्त्वंषड्विधेहेतुरिं
द्रियंकरणंमतं५८ द्रव्यप्रत्यक्षेमहत्त्वंसमवायसंबंधेनद्रव्यसमवेतानांगु

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

समवे

णकर्मत्वसामान्यानांप्रत्यक्षे स्वाश्रयसमवायसंबंधेन द्रव्यसमवेतानां गुणत्व
रूपत्वकर्मत्वादीनांप्रत्यक्षे स्वाश्रयसमवेतसामवायसंबंधेन कारणत्व
मितिइंद्रियमिति अत्रापिच द्विधइत्यनुवज्यते इंद्रियत्वंतु नजातिःपृ
थिवीत्वादिना संकरप्रसंगात् इंद्रियत्वंतु शब्देतरोद्भूतविशेषगुणानाश्र
यत्वेसति ज्ञानकारणमनःसंयोगाश्रयत्वंइंद्रियत्वं आत्मादिवारणाय
सत्यंतं उद्भूतविशेषगुणस्य श्रोत्रेपि सत्वात् शब्देतरेति विशेषगुणस्यरूपा
देश्चक्षुरादौसत्वात् उद्भूतेति उद्भूतत्वं नजातिःशुक्लत्वादिनासंकरात् नच
शुक्लत्वादिव्याप्यंनानैवोद्भूतत्वमिति वाच्यम् उद्भूतरूपत्वादि चाक्षुषादौज

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१। ऐकैकस्य कारणतावच्छेदकत्वे व्यभिचारात् कूटस्यैकत्राहत्तितया कारणतानवच्छेदकत्वादिति भावः १

४ नवीनमते मनःपदप्रयोजनमाह कालादाविति समवायेन घटाद्यभावानां काले सत्वेपि न तत्प्रत्यक्षं योग्यानुपलब्धेरभावादतो रूपाभावपर्यंतानुधावनम् ४

कूटे १

१ तथा च तादृशकूटस्य कारणतावच्छेदकत्वमिति नात्र इति भावः २ अभावकूटे तदभाव सत्त्वात् इति यावत्

असंभववारणाय २

नकत्वानुपपत्तेः किंतु शुक्लत्वादिव्याप्यमहत्त्वं नानातदभाववैशिष्ट्यमहत्त्वं तच्च संयोगादावप्यस्ति तथा च महद्वृत्तेरोद्भूतगुणः संयोगो विदुरादावस्ति अतो विशेषणेति कालादिवारणाय विशेष्यदलं इंद्रियावयवविषयसंयोगस्य प्राचांमते प्रत्यक्ष९ जनकत्वादिंद्रियावयववारणाय कालादौ रूपाभावप्रत्यक्षे सन्निकर्षघटकतया कारणीभूतचक्षुःसंयोगाश्रयस्य कालादेर्वारणाय वा मनःपदं ज्ञानकारणमित्यपि तद्वारणाय कारणमिति असाधारणं कारणं करणं असाधारणत्वं व्यापारवत्त्वं विषयेंद्रियसंबंधो व्यापारः सोपि षड्विधः व्यापारः सन्निकर्षः षड्विधं सन्निकर्षमुदाहरणद्वारा प्रदर्शयति द्रव्यग्रहस्तु संयोगात्संयुक्तसमवायतः ६० द्रव्येषु समवेतानां तथा तत्समवायतः तत्रापि समवेतानां शब्दस्य समवायतः ६१ तद्वृत्ती

जन्यत्वघटितस्य व्यापारत्वस्य शब्दे संबंधे २७ समवायरूपेऽभावादाह व्यापारः सन्निकर्ष इति ३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

न्या मु
३५

नांसमवेतसमवायेन तद्ग्रहः विशेषणतया तद्दभावानां ग्रहो भवेत्
६२ द्रव्यप्रत्यक्षे इन्द्रियसंयोगजन्यं द्रव्यसमवेतप्रत्यक्षे इन्द्रियसं
युक्तसमवायजन्यं एवमग्रेपि वस्तुतस्तु द्रव्यचाक्षुषं प्रति चक्षुःसंयोगः
कारणं द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः द्रव्यसमवेतसम
वेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवेतसमवायः एवमन्यत्रापि विशि
ष्यैव कार्यकारणभावः परं तु पृथिवीपरमाणुनीले नीलत्वं पृथिवीपर
माणौ च पृथिवीत्वं चक्षुषा कथं न गृह्यते तत्र परंपरयोद्भूतरूपसंबंधस्य च
सत्वात् तथाहि नीलत्वं जातिरेकैव परमाणुनीले घटनीले च वर्त्तते तथा च

राम
३५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

महत्वसंबंधोनीलघटमादायवर्त्ततेरूपसंबंधस्तु उभयमादायैववर्त्तते एवंपृथि
वीत्वेपिघटादिकमादायमहत्वसंबंधोबोध्यः एवंवायौतदीयस्पर्शादौ चसत्तायाश्चा
क्षुषप्रत्यक्षंस्यात्तस्मादुद्भूतरूपावछिन्नचक्षुःसंयुक्तसमवायस्यद्रव्यसमवेतप्रत्यक्षे
तादृशचक्षुःसंयुक्तसमवेतसमवायस्यद्रव्यसमवेतसमवेतप्रत्यक्षेहेतुत्वंवाच्यम् कार४
इत्थंचपरमाणुनीलादौननीलत्वादिग्रहः परमाणुचक्षुःसंयोगस्यमहत्वावछिन्न॰
त्वाभावात् एवंवाय्वादौसत्तादिचाक्षुषंतच्च चक्षुःसंयोगस्यरूपत्वावछिन्नत्वाभावात् ॰
एवंयस्यघटस्यपृष्ठावच्छेदेनालोकसंयोगः चक्षुःसंयोगस्त्वग्रावच्छेदेन तत्रघटप्रत्यक्षा
भावात् आलोकसंयोगावछिन्नत्वंचक्षुःसंयोगेविशेषणंबोध्यम् एवंद्रव्यस्यस्पार्श

न्याम्
३५ समवेत
स्यघ्राणज

नप्रत्यक्षेत्वक्संयोगःकारणंद्रव्यसमवेतस्यस्पार्शनप्रत्यक्षेत्वक्संयुक्तसमवायः
द्रव्यसमवेतस्यस्पार्शनप्रत्यक्षेत्वक्समवेतसमवायः अत्रापिमहत्वावच्छिन्नत्वंउ
द्भूतस्पर्शावच्छिन्नत्वंपूर्ववद्बोध्यम् एवंगंधप्रत्यक्षेघ्राण संयुक्तसमवायःगंधसमवे
तंप्रत्यक्षेघ्राणसंयुक्तसमवेतसमवायः एवंरसनप्रत्यक्षेरसनसंयुक्तसमवायःरसस
मवेतरासनप्रत्यक्षेरसनसंयुक्तसमवेतसमवायः एवंशब्दप्रत्यक्षेश्रोत्रावच्छिन्नसमवायः
शब्दसमवेतश्रावणप्रत्यक्षेश्रोत्रावच्छिन्नसमवेतसमवायः अत्रसर्वप्रत्यक्षेलौकिकं
बोध्यम् वक्ष्यमाणमलौकिकंप्रत्यक्षंइंद्रियसंयोगादिकंविनापिभवति एवमात्मप्रत्यक्षे
मनःसंयोगआत्मसमवेतमानसप्रत्यक्षेमनःसंयुक्तसमवायः आत्मसमवेत

राम
३५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

[illegible] समवेतमानसप्रत्यक्षे मनःसंयुक्तसमवेतसमवायः कार
णं अभावप्रत्यक्षे समवायप्रत्यक्षे च इंद्रियसंबद्धविशेषणताहेतुः वैशेषिकमते समवा
यो न प्रत्यक्षः अत्र यद्यपि विशेषणता नानावि[illegible]धा तथाहि भूतलादौ घटाभावः
संयुक्तविशेषणतया गृह्यते संख्यादौ रूपाद्यभावः संयुक्तसमवेतविशेषणतया संख्या
त्वादौ रूपाद्यभावः संयुक्तसमवेतविशेषणतया शब्दाभावः केवलश्रोत्रावच्छिन्नविशे
षणतया ककारादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसमवेतविशेषणतया एवं कत्वा
वच्छिन्नाभावे खत्वाभावादिकं विशेषणविशेषणतया घटाभावादौ पटाद्य
भावः संयुक्तविशेषणविशेषणतया एवमन्यत्राप्यूह्यं तथापि विशेषणता

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
न्यामु
३६

त्वेनैकैवसागएयते अन्यथाढोडासन्निकर्ष इतिप्राचांप्रवादो व्याहन्येत् यदिस्या
दुपलभ्येतेत्येवंयत्रप्रसज्यते प्रत्यक्षं समवायस्य विशेषणतया भवेत् ६३ ॥
अभावप्रत्यक्षे योग्यानुपलब्धिः कारणं तथाहि भूतलादौ घटादिज्ञाने घटाभावा
दिकं न ज्ञायते तेनाभावोपलंभे प्रतियोग्युपलंभाभावः कारणं तत्रयोग्यता
प्यपेक्षिता साच प्रतियोगिसत्त्वप्रसंजनप्रसंजितप्रतियोगिकत्वरूपा तदर्थश्च प्रति
योगिनो घटादेः सत्त्वप्रसक्त्या प्रसंजित उपलंभरूपः प्रतियोगी यस्य स उपलं
भाभावोभावप्रत्यक्षे हेतुः तथाहि यत्रालोकसंयोगादिकं वर्त्तते तत्रयद्यत्रघटः स्यात्
तर्ह्युपलभ्येतेत्यापादयितुं शक्यते तत्र घटाभावादिप्रत्यक्षं भवति अंधकारे तु

राम
३६

नापादयितुं शक्यते तेन घटाभावादेरंधकारेन चाक्षुषप्रत्यक्षं भवति स्पार्शनप्रत्य
क्षं तु भवत्येव आलोकसंबंधं विनापि स्पार्शनप्रत्यक्षस्यापादयितुं शक्यत्वात्
गुरुत्वादिकं यद्योग्यं तदभावस्तु न प्रत्यक्षः तत्र गुरुत्वादिप्रत्यक्षस्यापादयितुम
शक्यत्वात् वायावुद्भूतरूपाभावः पाषाणे सौरभाभावः गुडे तिक्ताभावः श्रो
त्रे शब्दाभावः आत्मनि सुखाभावः एवमादयस्तत्तदिंद्रियैर्गृह्यंते तत्तत्प्रत्य
क्षस्यापादयितुं शक्यत्वात् संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यता अन्योन्या
त्व२ भावप्रत्यक्षेऽधिकरणयोग्यत्वं अपेक्षितं अतः स्तंभे पिशाचादिभे [illegible] दः चक्षुषा
गृह्यत एव प्रत्यक्षं लौकिकालौकिकप्रभेदेन द्विविधं अत्र लौकिकप्रत्यक्षे षोढा

श्री
न्या०मु०
३७

सन्निकर्ष उक्तः अलौकिकसन्निकर्षान् इदानीं वदति अलौकिकस्तु व्यापारः
त्रिविधः परिकीर्त्तितः सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा ६५ व्यापारः
न्निकर्षः सामान्यलक्षणायस्येत्यर्थः तत्र लक्षणपदेन यदि स्वरूपमुच्यते तदा स्व सामान्य
रूपं प्रत्यासत्तिरित्यर्थो लभ्यते तच्चेंद्रियसंब[द्ध]विशेष्यकज्ञाने प्रकारीभूतं बोध्यं
तथाहि यत्रेंद्रियसंयुक्तो धूमादिस्तद्विशेष्यकं इति ज्ञानं जातं तत्र ज्ञाने धूम धूम४
त्वं प्रकारस्तत्र धूमत्वेन सन्निकर्षेण धूमा इत्येवंरूपं सकलधूमविशेष्यकं ज्ञानं जा
यते अत्र यदींद्रियसंबंधमित्युच्यते तदा धूलीपटले धूमभ्रमानंतरं सकलधू राम०
मविशेष्यकज्ञानं न स्यात् तत्र धूमत्वेन सहेंद्रियसंबंधाभावात् मन्मते तु इंद्रि

३७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यसंवद्धंधूलीपटलं तद्विशेष्यकंधूमइतिज्ञानंतत्रप्रकारीभूतं धूमत्वंप्रत्यासत्तिः
इंद्रियसंवंधस्यलौकिकोग्रास्त्त ःइदंचवहिरिंद्रियस्यलेमानॕस्यलेतुज्ञानप्रकारी
भूतंसामान्यंसन्निकर्षःपरंतुस मानानांभावःसामान्यंतत्त्वक्वचिन्नित्यंधूमत्वादिक्व
चिद्यानित्यंघटादि यत्रैकोघटःसंयोगसंवंधेनभूतलेसमवायसंवंधेनकपाले
विज्ञानस्तदनंतरंचसर्वेषांतद्घटवतांभूतलादीनांकपालानांवाज्ञानंभवति तत्रेदं
वोध्यं परंतुसामान्यंयेनसंवंधेनज्ञायतेतेनसंवंधेन अधिकरणानांप्रत्यासत्तिःकिं
तुतद्घटनाशानंतरंतद्घटवत्तःस्मरणंजातं तत्रसर्वेषांतद्घटवतांज्ञानंनस्यात्
सामान्यंतदानीमभावात् किंचेंद्रियसंवद्धविशेष्यकंघटइतिज्ञानंजातंतत्रपर

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

न्य १

दिनेइंद्रियसंबंधं विनापि तादृशज्ञानप्रकारीभूतसामान्यसत्वात्सकलघटविषयकं
ज्ञानं कुतो न भवति तस्मात्सामान्यज्ञानं प्रत्यासत्तिर्न तु सामान्यमित्याह आसत्ति
राश्रयाणां तु सामान्यज्ञानमिष्यते तथा च सामान्यलक्षण इत्यत्र लक्षणशब्दस्य
विषयोऽर्थः तेन सामान्यविषयकं ज्ञानं प्रत्यासत्तिरितीह लभ्यते ननु चक्षुःसंयो
गादिकं विनापि यत्र सामान्यज्ञानं वर्तते तत्र सकलघटादीनां प्रत्यक्षं स्याद त आ
ह तदिंद्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते ६५ अस्यार्थः यदा बहिरिंद्रियेण सामा
न्यलक्षणया ज्ञानं जननीयं तदा यत्किंचिद्धर्मिणि तत्सामान्यस्य
तदिंद्रियजन्यज्ञानसामग्र्यपेक्षिता सा च चक्षुःसंयोगालोकसंयोगादिकं तेनां

म १

धकारादौ चक्षुरादिना तादृशज्ञानं न जन्यते ननु ज्ञानलक्षणाप्रत्यासत्तिर्ज्ञानरू
पाय दि सामान्यलक्षणापि ज्ञानरूपा तदा तयोर्भेदो न स्यादत आह विषयी यस्य तस्यै
व व्यापारो ज्ञानलक्षणाः सामान्यज्ञानरूपा प्रत्यासत्तिर्हि तदाश्रयस्य ज्ञानं जन्य न
ते ज्ञानलक्षणाप्रत्यासत्तिरिति अस्यायमर्थः प्रत्यक्षे सन्निकर्षं विना भानं न संभ न४
वति धूम [illegible] त्वेन सकलधूमानां वह्नित्वेन सकलवह्नीनां च भानं कथं भवेत् तद
र्थं सामान्यलक्षणा स्वीक्रियते न च सकलवह्नि धूमाभावे काव्यतिरिति वाच्यम् प्र
त्यक्षधूमे वह्निसंबंधस्य गृहीतत्वाद न्यधूमस्य चानुपस्थितत्वात् धूमो वह्निव्याप्यो
न वेति संशयानुपपत्तेः मन्मते तु सामान्यलक्षणया सकलधूमोपस्थितौ कालां

वस्तुपक्षिविषयकं ज्ञानं तस्यैव प्रत्यासत्ति ४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
न्यामु
३९

तरीयदेशांतरीयधूमेवह्निव्याप्यत्वसंदेहः संभवति न च सामान्यलक्षणास्वीकारे प्रमेयत्वेन सकलप्रमेय
ज्ञाने जाते सर्वज्ञापत्तिरिति वाच्यम् प्रमेयत्वेन सकलप्रमेयज्ञानेपि विशिष्य सकलपदार्थानां अज्ञा
तत्वेन सार्वज्ञाभावात् एवं ज्ञानलक्षणाया अस्वीकारे सुरभि चंदनमिति ज्ञाने सौरभस्य भा
नं कथं स्यात् यद्यपि सामान्यलक्षणयापि सौरभस्य भानं भवति तथापि सौरभत्वस्य भानं
ज्ञानलक्षणया 'योगिनो द्विविधाः प्रोक्ताः युक्तयुंजानभेदतः ६६ युक्तस्य सर्वदा भानं चिं
तासहकृतोपरः योगिनो द्विविधा उक्ताः उंजानाः युक्ताः योगजधर्मस्यापि द्वैविध्यं युक्त
स्य तावद्योगजधर्मसहायेन मनसा आकाशपरमाण्वादिनिखिलपदार्थगोचरं ज्ञानं
सर्वदैव भवितुं अर्हतीति द्वितीयस्य चिंताविशेषासहकारीति ॥ इति श्री वि[illegible]श्व
नाथपंचाननविरचितायां सिद्धांतमुक्तावल्यां प्रत्यक्षपरिछेदः ॥ ॥ रामोस्तु प्रसन्नः राम
३९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अनुमितिंजुत्पादयति व्यापारस्तुपरामर्शःकरणंव्याप्तिधीर्भवेत् ॥६७॥ अनुमायांअनुमितौव्याप्ति
करणं ज्ञानंपरामर्शोव्यापारः तथाहियेनपुरुषेणमहानसादौधूमेवह्नेर्व्याप्तिर्गृहीतापश्चात्
सएवपुरुषःक्वचित्पर्वतादौअनवच्छिन्नमूलांधूमरेखांपश्यतितदनंतरंधूमोवह्नि
व्याप्यइत्येवंरूपंव्याप्तिस्मरणंतस्यभवतिपश्चाच्चवह्निव्याप्यधूमवानयंपर्वतइतिज्ञा
नंभवतिसएवपरामर्शइत्युच्यतेतदनंतरंपर्वतोवह्निमानितिज्ञानंजायतेतदेवानुमि
तिः तत्रप्राचीनावदंतिव्याप्यत्वेनज्ञायमानंधूमादिकंलिंगंकरणंतद्दूषयतिज्ञायमा
नंलिंगंतुकरणंनहिलिंगस्यानुमित्यकरणत्वेयुक्तिमाह॥ अनागतादिलिंगेनन
स्यादनुमितिस्तदा ॥६८॥ यद्यनुमितौलिंगंकरणंस्यात्तदानागतेनविनष्टेनवा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

लिंगेनानुमितिर्नस्यादनुमितिकरणस्य लिंगस्य तदानीमभावादिति व्याप्यस्य पक्षवृत्तित्व-
धीः परामर्श उच्यते व्याप्तिविशिष्टस्य पक्षेण सह वैशिष्ट्यावगाहि ज्ञानं अनुमितौ जनकं तच्च
पक्षो व्याप्यवानिति पक्षे व्याप्य इति च आद्यात्परामर्शात्पक्षः साध्यवानिति अनुमितिः
द्वितीयात्तु पक्षे साध्यमित्यनुमितिः द्विविधादपि परामर्शात्पक्षः साध्यवान् इत्येवानुमिति
रित्यन्ये नतु वह्निव्याप्यधूमवान्पर्वत इति ज्ञानं विनापि यत्र पर्वतो धूमवानिति प्रत्यक्षं ततो धू
मो वह्निव्याप्य इति स्मरणं तत्र ज्ञानद्वयादेवानुमितिदर्शनात् व्याप्तिविशिष्टवैशिष्ट्याव
शा गाहिनं न सर्वत्र कारणं किंतु व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन हेतुत्वं आव
श्यकत्वात् तत्र विशिष्टज्ञानकल्पनागौरवाच्चेति चेन्न व्याप्यतावच्छेदकाज्ञानेपि वह्निव्याप्य राम०
वानिति ज्ञानादनुमित्युत्पत्तेः लाघवाच्च व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन हेतुत्वम्

किंचधूमवान्पर्वतइतिज्ञानादनुमित्यापत्तिः व्याप्यतावच्छेदकीभूतधूमत्वप्रकारकपक्षधर्मता
ज्ञानस्यसत्वात् नचगरुसमाणव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्यहेतुत्वंवाच्यं
चैत्रस्यव्याप्तिग्रहेमैत्रस्यपक्षधर्मताज्ञानादनुमित्यापत्तेः यदितत्पुरुषीयगृहीतप्रमाणव्याप्य
तावच्छेदकप्रकारकंतत्पुरुषीयपक्षधर्मताज्ञानंतत्पुरुषीयानुमितौहेतुरुच्यते तदानंत
कार्यकारणभावा पत्तिःमन्मतेतुसमवायेनव्याप्तिप्रकारपक्षधर्मताज्ञानंसमवायेनानुमि
तिंजनयतीत्यर्थेनानंतकार्यकारणभावःयदितुव्याप्तिप्रकारकं पक्षधर्मताज्ञानंचस्वतं
त्रंकारणमित्युच्यतेतदाकार्यकारणभावद्वयंवह्निव्याप्योधूमवानालोकवान्पर्वतइतिज्ञानादनुमितिः
स्यादितिद्वयंचयत्रज्ञानद्वयंतत्रापि विशिष्टज्ञानंकल्पनीयंफलमुखगौरवस्यादोषत्वात्इति
या प्योव्याप्त्याश्रयःतत्रव्याप्तिःकेत्यतआहव्याप्तिःसाध्यवदन्यस्मिन्नसंबंधउदाहृतः ६८ ॥

साध्येति वह्निमान्धूमादित्यादौ साध्यं वह्निः साध्यवान्महानसादिस्तदन्यो जलह्रदादिस्त
द्वृत्तित्वं धूमस्येति लक्षणसमन्वयः धूमवान्वह्नेरित्यादौ साध्यवदन्यस्मिन्नयःपिंडादौ
वह्नेः सत्त्वान्नातिव्याप्तिः अत्र येन संबंधेन साध्यं तेनैव साध्यवान्बोध्यः अन्यथा
समवायसंबंधेन वह्निमान्वह्न्यवयवस्तदन्यो महानसादिस्तत्र धूमस्य विद्यमान
त्वादव्याप्तिप्रसंगात् साध्यवदन्यश्च साध्यवत्तावच्छिन्नप्रतियोगिताकभेदवान् तेन
यत्किंचिद्वह्निमतो महानसादेर्भिन्ने पर्वतादौ धूमस्य सत्त्वेपि न क्षतिः येन संबंधेन हेतु नाव्याप्तिः
तातेनैव संबंधेन साध्यवदन्यावृत्तित्वं बोध्यम् तेन वह्निमदन्यस्मिन्धूमावयवे धूम
स्य समवायसंबंधेन सत्त्वेपि न क्षतिः नाव्याप्तिः साध्यवदन्यावृत्तित्वं च साध्यवदन्यवृत्तित्वावच्छि राम
न्नाभावः तेन धूमवान्वह्नेरित्यत्र वह्नेः साध्यवदन्यजलह्रदादिवृत्तित्वाभावसत्त्वेपि ना ४१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

घटो

तिव्याप्तिः ॥ अत्र यद्यपि द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ विशिष्टसत्तायाः सत्ता
याश्चैक्यात् साध्यवदन्यस्मिन् गुणादाववृत्तित्वं नास्ति तथापि हेतुतावच्छेदकरूपे
ण वृत्तित्वं वाच्यं प्रकृते च विशिष्टसत्तात्वस्य हेतुतावच्छेदकत्वान्नाव्याप्तिः हेतुतावच्छेदकं यत्यन
वच्छेदकमिति फलितोर्थः ननु केवलान्वयिनि ज्ञेयत्वादौ साध्यवदन्यस्याप्रसिद्धत्वाद
व्याप्तिः किंच सत्तावान् जातेरित्यादौ साध्यवदन्यस्मिन् सामान्यादौ हेतुतावच्छेदक
संबंधेन समवायेन वृत्तेरप्रसिद्धत्वा दव्याप्तिरत आह ॥ अथवा हेतुमन्निष्ठविरहाप्रति
योगिना साध्येन हेतोरैकाधिकरण्यं व्याप्ति रुच्यते ९९ हेतुमति निष्ठा वृत्तिर्यस्य सः तथा वि
रहो भावस्तदप्रतियोगिना साध्येन हेतोः सामानाधिकरण्यं व्याप्तिः अत्र यद्यपि वह्नि
मान् धूमादित्यादौ हेत्वधिकरणपर्वतादिवृत्त्यभावप्रतियोगित्वं तत्तद्वह्न्यादेरस्तीत्यव्याप्तिः

सह२ यो१ महानसीय॥चत्वरीय१ पर्वतो२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

घटो

पर्वतीपु वह्निघटोनस्तः

न्यामृ नचवसामानाधिकरण्यवह्निधूमयोरेवव्याप्तिरितिवाच्यम् तद्धेत्वुभयाभावादिसत्त्वादेक

४२ सत्त्वेपिद्वयंनास्तीतिप्रतीतेः गुणवा न्द्रव्यत्वादित्यादौ अव्याप्तिश्च न थापिसाध्यतावच्छे गुणांतं

दकंप्रतियोगितानवच्छेदकंतदवच्छिन्नसाध्यसामानाधिकरण्यमितिवाच्यंतथाचहेतु

मन्निष्ठात्यंताभावप्रतियोगितानवच्छेदकंयत्साध्यतावच्छेदकमितिसिद्धंननुतथापिरू घटो

जातिप पत्वव्याप्यवान्पृथिवीत्वादित्यत्रसाध्यतावच्छेदकारूपत्वव्याप्यजातयःतासांचशुक्ल

त्वादिरूपजातीनांनील घटादिवृत्यभावप्रतियोगितावच्छेदकत्वमस्तीत्यव्याप्ति

स्वाश्रयसमवायसंबंधेन३ रितिचेन्न तत्रपरंपरयारूपत्वव्याप्यजातित्वस्यैवसाध्यतावच्छेदकत्वात् नहितादृशधर्मा

व च्छिन्नाभावः क्वापिपृथिव्यामस्ति रूपत्वव्याप्यजातिमान्नास्तीतिबुद्ध्यापत्तेः तथाचरूपत्वव्या रामः

प्यजातेरभावप्रतियोगितावच्छेदकत्वेपिजातित्वस्यप्रतियोगितावच्छेदकत्वाभावान्नाव्या

४२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्तिः एवं दंडिमान् दंडिसंयोगादित्यादावपि परंपरया दंडत्वमेव साध्यतावच्छेदकमिति नाव्याप्तिः साध्या
दिभेदेन व्याप्तेर्भेदात् तादृशस्थले साध्यतावच्छेदकं प्रतियोगितावच्छेदकतानवच्छेदकमित्ये
व लक्षणघटकमिति वदंति हेत्वधिकरणं हेतुतावच्छेदकविशिष्टाधिकरणं वाच्यं तेन द्रव्यं गु० घटे
णकर्मान्यत्वविशिष्टसत्त्वादित्यादौ शुद्धसत्ताधिकरणगुणनिष्ठाभावप्रतियोगित्वेपि द्रव्यत्व
स्यनाव्याप्तिः हेतुतावच्छेदकसंबंधेन [संयोगसंबंधेन] हेत्वधिकरणं बोध्यं तेन समवायेन धूमाधिकरणतदवयव
निष्ठाभावप्रतियोगित्वेपि वह्नेर्नाव्याप्तिः अभावश्च प्रतियोगिव्यधिकरणो बोध्यः [एतद्वृक्षे] तेन कपिसंयो
गी एतद्वृक्षत्वादित्यत्र मूलावच्छेदेन तद्वृक्षवृत्तिसंयोगाभावप्रतियोगित्वेपि संयोगस्यनाव्याप्तिः ॥
नच प्रतियोगिव्यधिकरणत्वं यदि प्रतियोग्यनधिकरणवृत्तित्वं तदा तथैवाव्याप्तिः प्रतिसंयोगिनः
कपिसंयोगस्यानधिकरणे गुणादौ वर्त्तते योऽभावस्तस्य वृक्षे मूलावच्छेदेन सत्त्वात् ॥ यदि ०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

न्यामु० प्रतियोग्यधिकरणवृत्तित्वं तदा संयोगी सत्त्वात् इत्यादौऽप्रतिव्याप्तिः सत्ताधिकरणगुणादौयः संयो

४३ गाभावः तस्य प्रतियोग्यधिकरणद्रव्यवृत्तित्वादिति वाच्यं हेत्वधिकरणे प्रतियोग्यनधिकरणवृ

त्तित्वविशिष्टस्य विवक्षितत्वात् प्रतियोग्यनधिकरणं हेत्वधिकरणमिति निष्कर्षः प्रतियोग्यनधि

करणं च प्रतियोगितावच्छेदकावच्छिन्नानधिकरणं बोध्यम् तेन विशिष्टसत्तावान् जाते रि

त्यादौ जात्यधिकरणगुणादौ विशिष्टसत्ताभावप्रतियोगिसत्ताधिकरणत्वेपि न क्षतिः अत्र साध्य नाव्याप्तिः५

समवायेन४ तावच्छेदकसंबंधेन प्रतियोग्यनधिकरणत्वं बोध्यम् तेन ज्ञानवान् सत्त्वादित्यादौ सत्ताधिकर

णघटादेर्विषयतासंबंधेन ज्ञानाधिकरणत्वेपि न क्षतिः इत्थं च वह्निमान् धूमादित्यादौ धूमा

धिकरणे समवायेन वह्निविरहसत्त्वेपि नाव्याप्तिः ननु प्रतियोगितावच्छेकावच्छिन्नस्य यस्य क राम०

स्यचिदनधिकरणत्वं तत्सामान्यस्य वा यत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वं ४३

प्रतियोगितावच्छेदकावच्छिन्नसामान्यस्य १ यत्किंचित्प्रतियोगितावच्छेदकं
तदवच्छिन्नतदवच्छिन्नसामान्यस्य १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एतद्वृत्तः प्रतियोगितावच्छेदकसंयोगत्वं

वाक्विवत्तितं ग्रोधकपिसंयोगी एतद्वृत्तत्वादित्यत्राव्याप्तिः कपिसंयोगाभावस्य प्रतियोगितावच्छेद

भिन्नकपि संयोगः तदनधिकरणभिन्नकपिसंयोगः

कावच्छिन्नो हि एतद्वृत्तिकपिसंयोगाभाववति तदनधिकरणे हि एतत् इति द्वितीये तु प्रतियोगिव्यधि

घटाभावात्मक

करणाभावाप्रसिद्धिः सर्वस्यैवाभावस्य पूर्वलक्षणे वृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिस

प्रकृते

मानाधिकरणत्वात् न च वह्निमान् धूमादित्यादौ घटाभावादेः पूर्वलक्षणे वृत्तित्वविशिष्टस्वा

घटाभावात्मक स्वाभावीयविशेषणतया संयोगसंबंधेन

भावात्मकप्रतियोग्यधिकरणत्वेऽपि पर्वतादेस्तथापि [illegible] था साध्यतावच्छेदकसंबंधेन तत्

पर्वते घटाभावः

प्रतियोग्यनधिकरणत्वमस्त्येवेति कथं प्रतियोग्यव्यधिकरणाभावाप्रसिद्धिरिति वाच्यं घटाभा

वह्न्यभावस्य

वे यो वह्न्यभावस्तस्य घटाभावात्मकतया घटाभावस्य वह्निरपि प्रतियोगी तदधिकरणं च पर्वता

दीति क्रमेण प्रतियोगिव्यधिकरणस्याप्रसिद्धत्वात् यदि तु घटाभावादौ वह्न्यभावादिर्भिन्न

हृदी

इत्युच्यते तथापि धूमाभाववान् वह्न्यभावादित्यादावव्याप्तिः तत्र साध्यतावच्छेदकसंबंधः स्व

दा।

घटाभावात्मक

न्याम रूपसंबंधः तेनसंबंधेनसर्वस्यैवाभावं पूर्ववत्तणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिक

४८ रणत्वात् हेत्वधिकरण[illegible]स्येति तृतीये तु कपिसंयोगाभाववानात्मत्वादित्यादौ अव्याप्तिः त

आत्मवृत्तिः कपिसंयोगाभावाभावः कपिसंयोगस्तस्य प्रतियोगितावच्छेदकं गुणसा

मान्याभावत्वमपि तदवच्छिन्नानधिकरणत्वं च हेत्वधिकरणस्यात्मन इति मैवं याहृश

प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्ताहृशप्रतियोगितानवच्छे

दकत्वस्य विवक्षितत्वात् ननु कालोघटवान् कालपरिमाणादित्यत्र प्रतियोगिव्य

धिकरणाभावाप्रसिद्धिः हेत्वधिकरणस्य महाकालस्य जगदाधारतया सर्वेषामे

वाभावानां साध्यतावच्छेदकसंबंधेन कालिकविशेषणतया प्रतियोग्यधिकरण राम

त्वात् अत्र केचिन्महाकाले भेदविशिष्टघटाभाव स्तत्र प्रतियो[illegible]ः ४४

महाकालस्यघटाधारत्वेपिमहाकालभेदविशिष्टघटानाधारत्वान्महाकालेमहाकालभेदाभावात्
वस्तुतस्तुप्रतियोगितावच्छेदकसंबंधेनप्रतियोग्यनधिकरणीभूतहेत्वधिकरणाहत्यभावप्रतियोगि
तासामान्येयत्संबंधावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावस्तेनसंबंधेनतद्धर्मावच्छिन्नस्य तद्रूप
व्यापकत्वंबोध्यम् व्यापकसामानाधिकरण्यंव्याप्तिः इत्यत्रचकालोघटवान् कालपरिमाणादि
त्यादौसंयोगसंबंधेनघटाभावप्रतियोगिनोघटस्यानधिकरणेहेत्वधिकरणेमहाकालेवर्तमा
नएवसंयोयोगेनघटाभावस्तस्यप्रतियोगितायांकालिकसंबंधावच्छिन्नत्वस्यघटत्वावच्छिन्नत्वोभ
याभावस्यसत्वान्नाव्याप्तिः ननुप्रमेयवह्निमान्धूमादित्यादौप्रमेयवह्नित्वावच्छिन्नत्वमप्रसिद्धं
गुरुधर्मस्यानवच्छेदकत्वात् इतिचेन्नकंबुग्रीवादिमान्नास्तीतिप्रतीत्याकंबुग्रीवादिमत्वा
वच्छिन्नप्रतियोगिताविषयीकरणेनगुरुधर्मस्यावच्छेदकत्वादितिसंक्षेपः पत्र ८०

सि॰ नि

नित्वमित्यत्रपक्षतत्वंकिंतदाह।सिसाधयिषयाशून्यासिद्धिर्यत्रनतिष्ठतिसपक्षस्तत्रवृत्तित्वज्ञानादनु
मितिर्भवेत् १० सिसाधयिषाविरहविशिष्टायाःसिद्धेरभावःपक्षतातद्वान्पक्षइत्यर्थः सि
साधयिषामात्रंनपक्षताविनापिसिसाधयिषांघनगर्जितेनमेघानुमानात् अतएवसाध्यसं
देहोपिनपक्षताविनासंदेहंघनगर्जितेनमेघानुमानात्सिद्धौसत्यामपिसिसाधयिषा
सत्वेपिअनुमितिर्भवत्येवअतःसिसाधयिषाविरहविशिष्टत्वंसिद्धौविशेषणंतथाचयत्रसि
द्धिर्नास्तितत्रसिसाधयिषायांसत्यांअसत्यामपिपक्षतायत्रसिसाधयिषास्तितत्रसिद्धौसत्या
मसत्यामपिपक्षतायत्रसिद्धिरस्तिसिसाधयिषानास्तितत्रनपक्षतासिसाधयिषाविरहविशि
ष्टसिद्धेःसत्वात्ननुयत्रपरामर्शानंतरंसिद्धिस्ततःसिसाधयिषातत्रसिसाधयिषाकाले १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नाधिकरण्येन साध्यसिद्धावपि तदवच्छेदेनानुमितिदर्शनात् पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति पक्षतावच्छेदकावच्छे
देन सिद्धेरेव प्रतिबंधकत्वात् पक्षतावच्छेदकसामानाधिकरण्येनानुमितिं प्रति तु सिद्धिमात्रं विरोधीति बोध्यं अयं पु
रुषो न वेति संशयानंतरं पुरुषत्वव्याप्यकरादिमानयमिति तत्र सत्यामनुमित्सायां पुरुषत्वस्य प्रत्यक्षं भवति न त्वनु
मितिः अतोनुमित्साविरहविशिष्टसमानविषयकप्रत्यक्षसामग्री कामिनीजिज्ञासादिवत् स्वातंत्र्येण प्रतिबंधिका
एवं परामर्शानंतरं विना प्रत्यक्षेच्छां पक्षादिप्रत्यक्षानुत्पत्तेः प्रत्यक्षेच्छाविरहविशिष्टानुमितिसामग्री भिन्नविष
यकप्रत्यक्षे प्रतिबंधिका प्रसंगाद्धेत्वाभासान् विभजते अनैकांतो विरुद्धश्चाप्रसिद्धः प्रतिपक्षितः कालात्ययापदिष्ट
श्च हेत्वाभासाश्च पंचधा ॥ तल्लक्षणं तु यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तत्त्वं तथा हि व्यभिचारादिविष
यकत्वेन ज्ञानस्यानुमितिविरोधित्वात्ते दोषाः पदविषयकत्वं यादृशविशिष्टविषयकत्वं बोध्यम् तेन बाध
भ्रमस्यानुमितिविरोधित्वेपि तत्र पर्वतो वह्न्यभाववानिति विशिष्टस्याप्रसिद्धत्वादिदं न हेतुदोषः न च यत्र
वह्न्यभावव्याप्यपाषाणमयत्ववान् इति परामर्शकाले वह्निव्याप्यधूमस्याभासत्वं न स्यात् तत्र वह्न्यभा
वव्याप्यवान् पक्ष इति विशिष्टस्याप्रसिद्धत्वादिति वाच्यम् इष्टापत्तेः अन्यथा बाधस्याप्यनित्यदोषा था ४
पत्तेः तस्मात्तत्र वह्न्यभावव्याप्यपाषाणमयत्ववान् इति परामर्शकाले वह्निव्याप्यधूमस्य नाभासत्वं भ्र
मादनुमितिप्रतिबंधमात्रं हेतुस्तु न दुष्ट इति इत्थं च साध्याभाववद्वृत्तिहेत्वादिकं दोषः तद्वान् च हेतौ येन
केनापि संबंधेनेति नव्याः परे तु यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तद्वत्त्वं हेत्वाभासत्वम् ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

४७ सत्प्रतिपक्षे विरोधिव्याप्त्यादिकमेव न यानदत्वे हेतोर्ज्ञानरूपसंबंधेन नचैवं वह्निमान् धूमादित्यादौ पक्षे
साध्याभावविषयकत्वेनानुमितिविरोधात् ज्ञानरूपसंबंधेन तद्वत्वस्यापि सत्वात् सद्धेतावपि बाधित(
त्वापत्तिरितिवाच्यम् तत्र ज्ञानस्य संबंधत्वाकल्पनात् अत्र सत्प्रतिपक्षव्यवहारेण तत्कल्पनात् तत्र
बाधितव्यवहारादित्याहुः अनुमितिविरोधित्वं च अनुमितितत्करणान्यतरविरोधित्वं तेन व्यभिचा
रिणि नाव्याप्तिः द्रोहज्ञानं च यद्धेतुविषयकं तद्धेतुकानुमितौ प्रतिबंधकं तेन एकहेतौ व्यभिचारज्ञाने हे(
त्वंतरेणानुमित्युत्पत्तेः तदभावाद्यनवगाहित्वाच्च व्यभिचारस्यानुमितिविरोधित्वाभावेपि न क्षतिरिति सं
क्षेपः याहृशपक्षकसाध्ये हेतौ यावंतो दोषास्तावदन्यान्यत्वं तत्र हेत्वाभासत्वं पंचकथनं तु तत्संभवस्य
लाभिप्रायेण आद्यः साधारणस्तु स्यादसाधारणकोपरः तथैवानुपसंहारी त्रिधानैकांतिको भवेत् ७२
साधारणाद्यन्यतमत्वमनैकांतिकत्वं साधारणः साध्यवदन्यवृत्तिः तेन च व्याप्तिग्रहः प्रतिबंधः क्रियते
असाधारणः साध्यासमानाधिकरणो हेतुः तेन साध्यसामानाधिकरण्यग्रहः प्रतिबध्यते शब्दो नि
त्यः शब्दत्वादित्यादौ त्वसाधारणः अन्ये तु सपक्षावृत्तिरसाधारणः सपक्षश्च निश्चितसाध्यवान्
वृत्त्यं च शब्दो नित्यः शब्दत्वादित्यादौ पक्षापक्षेसाध्यनिश्चयसत्वदानासाधारण्यं न त्वे हेतुनिश्चयादिति ४७
वदंति अनुपसंहारी च अत्यंताभावाप्रतियोगिसाध्यकादिः अनेन च व्यतिरेकव्याप्तिप्रतिबंधकः क्रियते
विरुद्धस्तु साध्यव्यापकीभूताभावप्रतियोगी अयं च साध्याभावग्रहसामग्रीत्वेन प्रतिबंधकः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

परामर्शनाशान्नानुमितिः यत्र सिद्धिपरामर्शसिसाधयिषाः क्रमेणाभवंति तत्र च सिसाधयि
सिसाधयिषाकाले सिद्धेर्नाशात्प्रतिबंधकाभावात् एवानुमितिः यत्र च सिसाधयिषा
धयिषासिद्धिपरामर्शास्तत्र परामर्शकाले तु सिसाधयिषैव नास्ति एवमन्यत्रापि सिद्धि
कालेपरामर्शकाले च न सिसाधयिषा योग्यविभुविशेषगुणानां यौगपद्यनिषेधात् कथं सि
साधयिषाविरहविशिष्टत्वासिद्धिविशेषणमिति चेत् यत्र वह्निव्याप्यधूमवान्पर्वतो वह्निमा
निति प्रत्यक्षं संजातं ततः सिषाधयिषा न जाता तत्र सिसाधयिषाविरहविशिष्टसिद्धिसत्त्वा
तस्यावयवव्यावृत्तिरिति प्रवदेदं बोध्यम् यादृशसिद्धिसत्त्वे सिसाधयिषासत्त्वे पक्षलिंगकानुमितिस्ता
दृशसिसाधयिषाविरहविशिष्टसिद्धिसामान्याभावः पक्षलिंगकानुमितौ पक्षता तेन सिद्धिपरामर्श
सत्त्वेऽपि यत्किंचिज्ज्ञानं जायतामितीच्छायामपि नानुमितिः वह्निव्याप्यधूमवान्पर्वतो वह्नि
मानिति प्रत्यक्षसत्त्वे प्रत्यक्षातिरिक्तज्ञानं जायतामितीच्छायामनुमितिरेव एवं च परामर्शसत्त्वे
ऽपि लोके न वह्निमनुमिनुयामितीच्छायामपि नानुमितिः सिसाधयिषाकाले यादृशसिद्धिसत्त्वे विरह२
नानुमितिस्तादृशसिद्धिविशिष्टस्यैव न च तदनुमितौ प्रतिबंधकत्वात्तथा न च पर्वतो ने
नैतीपाधीयाणमयो वह्निमानिति ज्ञानसत्त्वेऽप्यनुमितेर्न विरोधः परंतु पक्षतावच्छेदकसामा

48

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative